**A–BRL–M–L–TBOA**

# SANSKRIT

PAPER—I

( LITERATURE )

| Time Allowed : Three Hours | Maximum Marks : 250 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in two Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in chronological order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड—A / SECTION—A

1. (a) अधोनिर्दिष्टाः सर्वे प्रश्नाः **संस्कृतभाषया** एव *2–3* पंक्तिषु समाधेयाः — 1×10=10

   (i) ए, द, व वर्णानाम् उच्चारणस्थानानि लेख्यानि।

   (ii) का गुणसंज्ञा? गुणसंज्ञाविधायकं सूत्रं लिख्यताम्।

   (iii) हश्-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

   (iv) सूत्रोल्लेखपुरस्सरं सन्धिकार्यं विधेयम्—'गो + इन्द्रः'।

   (v) 'लघुत्रयी'मध्ये परिगणितानां काव्यानां नामानि लिखत।

   (vi) केषां वर्णानां वृद्धिसंज्ञा भवति?

   (vii) 'रामायणम्' कति काण्डेषु विभक्तमस्ति?

   (viii) ''दण्डेन संन्यासी प्रतीयते''—वाक्येऽस्मिन् 'दण्डेन' इति पदे केन सूत्रेण का विभक्तिः प्रयुक्ता?

   (ix) 'रीतिरात्मा काव्यस्य' इति केनाचार्येण सिद्धान्तितम्?

   (x) वैदिकभाषायाः कृते पाणिनिना किं नाम प्रदत्तम्?

   (b) अधस्तनेषु वाक्येषु रेखाङ्कितपदानां विभक्तिप्रयोगस्य औचित्यं सूत्रोल्लेखपुरस्सरं **संस्कृतभाषया** *3–4* पंक्तिषु निर्णेयम्— 10

   (i) <u>गोधूमचूर्णं</u> रोटिकां पचति पाचकः।

   (ii) ऋषयः <u>राक्षसेभ्यः</u> बिभ्यति।

   (iii) <u>विद्यया</u> विनयः वर्धते।

   (iv) <u>वने</u> उपवसति।

   (c) कथा-आख्यायिकयोः वैशिष्ट्यं सम्प्रदर्श्य तयोरुदाहरणानि प्रदेयानि। उत्तरं *10-12* पंक्तिपरिमितं संस्कृते स्यात्। 5

   (d) **कस्याप्येकस्य** ऐतिहासिकमहाकाव्यस्य परिचयः संक्षेपेण *150* शब्देषु **संस्कृतभाषया** प्रस्तूयताम्। 10

   (e) ध्वनिपरिवर्तनदृष्ट्या **स्वरसन्धीनां** कानिचिद् उदाहरणानि प्रस्तूय विवेचना *150* शब्देषु संस्कृतभाषया कार्या। 10

   (f) अव्ययोपसर्ग-भेदं सोदाहरणं केवलं *65-70* शब्दैः स्पष्टीक्रियताम्। 5

2. (a) वैदिकसंस्कृतस्य प्रमुखवैशिष्ट्यं सोदाहरणं *250* शब्देषु विविच्यताम्। 20

   Explain the chief characteristics of Vedic Sanskrit with apt illustrations within *250* words.

(b) लौकिकसंस्कृते उपसर्गप्रयोगवैशिष्ट्यं सोदाहरणं *250* परिमितेषु शब्देषु प्रतिपाद्यताम्। 15

Explain with apt illustrations the peculiarities of use of Upasargas (prefix) in classical Sanskrit language in about *250* words only.

(c) अधोलिखितानां सूत्राणाम् अर्थोदाहरणानि *4–5* पंक्तिषु (प्रत्येकस्य सूत्रस्य कृते पृथक्-पृथक्) लेख्यानि— 3×5=15

Write the meaning and examples of the following Sūtras. Each answer should be given in *4–5* lines only :

(i) एङः पदान्तादति

(ii) झलां जशोऽन्ते

(iii) संख्यापूर्वो द्विगुः

(iv) यतश्च निर्धारणम्

(v) आख्यातोपयोगे

3. (a) "किं प्रमाणमिदं काव्यं कस्य प्रतिष्ठा महात्मनः।
कर्त्ता काव्यस्य महतः क चासौ मुनिपुङ्गवः॥"

इति कथनस्यालोके 'रामायण'स्य महाकाव्यत्वं *400* परिमितेषु शब्देषु संसाधनीयम्। 25

Prove the Mahākāvyatva of 'Rāmāyaṇa' in the light of below mentioned statement within *400* words :

"किं प्रमाणमिदं काव्यं कस्य प्रतिष्ठा महात्मनः।
कर्त्ता काव्यस्य महतः क चासौ मुनिपुङ्गवः॥"

(b) किन्नाम मुक्तकम्? काव्यसाहित्ये तस्य महत्त्वं प्रतिपाद्य केषाञ्चिन् मुक्तककाव्यानां परिचयः *400* शब्देषु लेखनीयः। 25

What is a Muktaka? Illustrating its importance in Kāvya literature, write an introductory note in about *400* words on some Muktaka-kāvyas.

4. (a) 'काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला' **अथवा** 'बाणोच्छिष्टं जगत्सर्वम्' इति भणितेराशयं सोदाहरणं *400* परिमितेषु शब्देषु स्फोरयत। 25

Explain with apt illustrations, in about *400* words, the following :

'काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला' *Or* 'बाणोच्छिष्टं जगत्सर्वम्'

(b) संस्कृतकाव्यशास्त्रे स्वीकृतानि काव्यप्रयोजनानि अधिकृत्य *400* परिमितेषु शब्देषु विमर्शो विधीयताम्। 25

Examine critically the objects of poetry (काव्यप्रयोजनानि) as accepted in Sanskrit poetics. Answer should be in about *400* words.

**5.** अत्र प्रश्ने उपखण्डेषु प्रदत्ताः सर्वेऽपि प्रश्नाः **संस्कृतभाषया** एव समाधेयाः —

*(a)* 'प्रशासने राजनीतिको हस्तक्षेपः' इति विषयमवलम्ब्य *150* शब्देषु निबन्धमेकं संस्कृतेन विरच्यताम्। 10

*(b)* मूर्त्तिकलाक्षेत्रे गान्धारकलायाः वैशिष्ट्यं *150* शब्देषु संस्कृते प्रस्तूयताम्। 10

*(c)* 'चत्वारि आर्यसत्यानि' कानि? संक्षेपेण व्याख्यायताम्। उत्तरं *65-70* शब्देषु वाञ्छितम्। 6

*(d)* 'सर्वेषां राजतन्त्राणां लोकतन्त्रं विशिष्यते' इति विषयमधिकृत्य *200* शब्दपरिमितं निबन्धमेकं संस्कृतेन विरच्यताम्। 12

*(e)* मानवजीवने संस्काराणां प्रयोजनं प्रदर्श्य षोडशसंस्काराणां नामानि लेख्यानि। कस्याऽप्येकस्य संस्कारस्य संक्षेपेण परिचयोऽपि देयः। उत्तरं *200* शब्दपरिमितम् अपेक्षितम्। 12

**6.** *(a)* भारतीयस्थापत्यकलायाः प्रमुखभेदान् प्रदर्श्य कस्याप्येकस्य प्रभेदस्य वैशिष्ट्यं सोदाहरणं *250* शब्देषु प्रतिपाद्यताम्। 20

Showing main types of Indian architectural art, explain with apt illustrations the peculiarities of any one of them in about *250* words.

*(b)* जैनाभिमतस्य स्याद्वादसिद्धान्तस्य स्वरूपं प्रदर्श्य दर्शनक्षेत्रे तस्योपयोगित्वं *250* शब्देष्वेव निर्णेयम्। 15

Explaining the nature of Syādvāda as propounded by the Jainas, examine its utility in the field of philosophy within *250* words.

*(c)* प्राचीनभारते आयुर्वेदस्य विकासमधिकृत्य *250* शब्देषु स्वकीयान् विचारान् प्रकटयत। 15

Give your opinion within *250* words on the development of Ayurveda in ancient India.

**7.** *(a)* अध्यारोपापवादयोः स्वरूपं सोदाहरणं *150* शब्दैः व्याख्यायताम्। 10

Explain within *150* words the nature of अध्यारोप and अपवाद with illustrations.

*(b)* 'योग' इति शब्दस्य अर्थं विचार्य योगस्य अष्टाङ्गानां नामानि (*150* शब्देष्वेव) परिचयपूर्वकं लेख्यानि। 10

What is the meaning of Yoga? Write (in *150* words only) the names of eight limbs of Yoga with their introduction.

*(c)* प्राचीनभारतीयसंस्कृतेः कानि मूलतत्त्वानि? किञ्च तेषां वैशिष्ट्यम्? केवलं *400* शब्देषु स्वकीयान् विचारान् प्रकटयत। 25

What are the basic tenets of ancient Indian culture? What are their peculiarities? Explain your views within *400* words.

*(d)* पुरुषबहुत्वसिद्ध्यै सांख्याभिमतहेतूनाम् उल्लेखः *70–75* शब्देषु करणीयः। 5

Point out the arguments given by Sāṁkhya to prove the plurality of Puruṣa. Answer should be within *70–75* words only.

**8.** *(a)* अधःप्रदत्तं सन्दर्भं सम्यगवधार्य तदधस्तात् प्रदत्तानां प्रश्नानामुत्तरं देवनागरीलिप्यां स्वेन संस्कृतेन देयम्। प्रत्येकम् उत्तरं *3–4* पंक्तिषु भवेत्— 5×5=25

राष्ट्राभ्युदयाय प्राचीनसमये द्वौ नियमावपाल्येताम्। तयोरेकतरो राजद्वारेण प्राचाल्यत अपरश्च लोकसंस्थया। श्रेणीनिगमपाषण्डगणभेदेन लोकसंस्था चतुर्विधाऽऽसीत्। इमाश्चतस्रोऽपि संस्थाः सार्वजनिकत्वेन बभूवुः। श्रेणी शिल्पिनां, निगमो वणिजां, पाषण्डो धर्मसम्प्रदायानां, गणश्च राजनीतिकसंघानामासीत्। एतासां संस्थानां नियमाः 'सामयिक' इत्येतेन शब्देन व्यवह्रियन्त। अयं 'सामयिक'शब्दः स्मृतिषु 'सवित्' इत्युक्तः। लोके ये केऽपि देयभागा आसंस्ते सर्वे सामयाचारिकनियमेनैव समापाद्यन्त न तु राजानुज्ञया। सामदानदण्डादिविषयिणी राजनीतिस्तत्प्राप्तिसाधनानि च 'औपयिकम्' इत्येतेन शब्देन व्यवह्रियन्ते स्म। कौटल्येन व्यावहारिकधर्मोऽप्येको निरूपितः। विवाहदायभागवास्तुविक्रयसमयर्णदानौपनिधिकदासकर्मकरकल्पसम्भूयसमुत्थानसाहसवाक्पारुष्यदण्डपारुष्यादि-व्यवहारान् आत्मन्यभिव्याप्य एष शब्दो विजृम्भते। राज्यस्य समुत्कर्षार्थं जनपदमात्यकोशमित्रसम्पदामवाप्तियोजनं, मन्त्रप्रभूत्साहशक्तीनामर्जनमधिकृत्य राजशास्त्रेषु सविशदं प्रतिपादनं वर्तते।

*(i)* का नाम लोकसंस्था? कतिविधा च सा? नामानि लेख्यानि।

*(ii)* 'सामयिक' इति पदेनात्र कोऽभिप्रायः?

*(iii)* 'औपयिकम्' इति किम्?

*(iv)* राज्यस्य उन्नत्यै कासां सम्पदाम् अर्जनं निर्दिष्टम्?

*(v)* देयभागानां वितरणे के नियमाः परिपाल्यन्ते स्म?

*(b)* अधःप्रदत्तं सन्दर्भं सम्यगवधार्य तदधस्तात् प्रदत्तानां प्रश्नानामुत्तरं देवनागरीलिप्यां स्वसंस्कृतभाषया देयम्। प्रत्येकम् उत्तरं *3–4* पंक्तिषु एव देयम्— 5×5=25

प्राचीनैः रूपकैर्ज्ञायते यत् तेषु दिवसेषु वराकाः निःस्वाः पुरुषाः मृण्मयेषु गेहेषु वासं चक्रिरे। छदिस्तेषां तृणमयी अक्रियत। धनिनां गेहनिर्माणे ग्राव्णामिष्टिकानाञ्च प्रयोगो व्यधीयत। तत्र काष्ठगृहाणामपि वर्णनं दृग्गोचरं भवति। गृहाणां भित्तयः सुधासिताश्चित्रविचित्राः, कुट्टिमानि चानर्घद्रव्यैः प्राणीयन्त। मौर्यकाले काष्ठगेहा बहवोऽदृश्यन्त। पुरातत्त्वज्ञैरशोकस्य काष्ठदुर्गोत्खननं कारयित्वा तथ्यमिदं जनसामान्यस्य पुरस्तात् प्रस्तुतीकृतम्। प्रायेण गृहा द्विवासा निरमीयन्त। आभ्यन्तरो वामभागो वामानां निमित्तेन बाह्यश्च प्रकोष्ठभागः पुंसां निमित्ताद् व्यरच्यत। वसन्तसेनायाः भवनं तु अष्टप्रकोष्ठम् आसीद् इति वर्णितं मृच्छकटिके। गृहेषु सुरम्या स्तम्भावली, भित्तयश्च चारुचित्रचित्रिताः क्रियन्ते स्म। गृहस्य प्रघाणप्रदेशे निष्कुट-दीर्घिका-कूपादीनामपि यथास्थानं निर्माणं कृतमभूत्। नगराण्यपि सुनियोजितान्यासन्। परिखाभिः सुरक्षितानि, विविधदुर्गैश्च सुसज्जितानि नगराणि आपत्कालेष्वपि प्रजानां कृते सर्वसौविध्ययुक्तानि बभूवुः।

*(i)* निर्धनानां गृहाः कीदृशाः बभूवुः?

*(ii)* काष्ठनिर्मितगेहानां प्रचलनं कदा प्राप्यते?

*(iii)* गृहेषु स्त्रीणामावासो कस्मिन् भागे भवति स्म?

*(iv)* गृहस्य पृष्ठभागेषु किंविधं निर्माणं क्रियते स्म?

*(v)* आपत्कालेषु प्रजासुरक्षार्थं नगराणि कीदृशानि निर्मीयन्ते स्म?

★ ★ ★

CS (Main) Exam : 2014

**C–DRN–N–L–UBOA**

SANSKRIT

PAPER—I

( LITERATURE )

Time Allowed : Three Hours

Maximum Marks : 250

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in two Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in chronological order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड—A / SECTION—A

1\. *(a)* अधोनिर्दिष्टाः सर्वे प्रश्नाः **संस्कृतभाषया** एव *2–3* पंक्तिषु समाधेयाः — 1×10=10

*(i)* ह, च, र वर्णानाम् उच्चारणस्थानानि लेख्यानि।

*(ii)* वृद्धिसंज्ञा-विधायकं सूत्रं सोदाहरणं लिख्यताम्।

*(iii)* झश्-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

*(iv)* वाच्यपरिवर्तनं क्रियताम्—

गोपालः गां दुग्धं दोग्धि।

*(v)* 'बृहत्त्रयी'-मध्ये परिगणितानि महाकाव्यानि कानि सन्ति?

*(vi)* 'ध्वनिरात्मा काव्यस्य' इति कस्य आचार्यस्य मतम्? कश्च अभिप्रायः?

*(vii)* 'महाभारतम्' कति पर्वसु विभक्तमस्ति? तेषां पर्वणां विभाजनकारणानि लेख्यानि।

*(viii)* 'पीताम्बरः' इत्यत्र विग्रहपूर्वकं समास-नाम लिखत।

*(ix)* महाकवेः कालिदासस्य नाटकानि कानि सन्ति?

*(x)* कति वेदाः? के च ते? के च विषयास्तत्र प्रामुख्येन प्रतिपादिताः सन्ति?

*(b)* अधोलिखितेषु वाक्येषु रेखाङ्कितेषु पदेषु विभक्तिप्रयोगाः केन सूत्रेण विधीयन्ते? विभक्तिप्रयोगस्य औचित्यमपि निर्णेयम्, **संस्कृतभाषया** *3–4* पंक्तिषु— 2×5=10

*(i)* मुनित्रयं नमस्कृत्य।

*(ii)* जटाभिः तापसः।

*(iii)* मासमधीते।

*(iv)* भक्ताय धारयति मोक्षं हरिः।

*(v)* उपाध्यायादधीते।

*(c)* अधोलिखितानां सूत्राणाम् अर्थोदाहरणानि **संस्कृतेन** लेख्यानि— 2×5=10

*(i)* षष्ठी शेषे।

*(ii)* परः सन्निकर्षः संहिता।

*(iii)* यरोऽनुनासिकेऽनुनासिको वा।

*(iv)* कर्तृकरणयोस्तृतीया।

*(v)* हशि च।

(d) महाकाव्य-खण्डकाव्ययोः वैशिष्ट्यं सम्प्रदर्श्य कस्याप्येकस्य संस्कृतमहाकाव्यस्य महाकाव्यत्वं **संस्कृतभाषया** साध्यताम् *150* शब्देषु। 10

(e) 'चम्पू'-काव्यस्य लक्षणोल्लेखनपुरस्सरं कस्याप्येकस्य चम्पूकाव्यस्य वैशिष्ट्यं **संस्कृतेन** लिख्यताम् (*10-15* पंक्ति परिमितम्)। 5

(f) पद-प्रातिपदिकयोः को भेदः? प्रातिपदिकार्थे का विभक्तिः भवति? 5

**2.** (a) वैदिक-संस्कृत लौकिक-संस्कृतयोः साम्यं वैषम्यञ्च *250* शब्देषु विविच्यताम्। 20

Explain the similarities and differences in Vedic Sanskrit and Classical Sanskrit in *250* words.

(b) भाषाविज्ञानदृष्ट्या संस्कृतस्य आङ्गलभाषया सहसम्बन्धोऽस्ति न वा? इति विविच्य भाषोत्पत्तिविषयकानि मतानि *250* परिमितेषु शब्देषु विविच्यताम्। 15

Is there any relationship between Sanskrit and English in the light of linguistics? After explaining this also explain different perspectives of origin of language in *250* words.

(c) प्रसिद्धाः ध्वनिनियमाः सोदाहरणं व्याख्येयाः। 15

Explain important phonetic laws with suitable examples.

**3.** (a) "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् कचित्।"

इति कथनं *400* परिमितेषु शब्देषु समालोच्यताम्। 25

"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् कचित्।"

Explain the given statement in *400* words.

(b) संस्कृत-काव्यशास्त्रेषु प्रतिपादितं काव्यलक्षणं सोदाहरणं विविच्यताम्। 25

Explain with examples characteristics of Kāvya as mentioned in Sanskrit poetics.

**4.** (a) "उत्तररामचरिते भवभूतिर्विशिष्यते।"

इति कथनं सोदाहरणं समीक्ष्यताम्। 25

"उत्तररामचरिते भवभूतिर्विशिष्यते।"

Explain this statement with examples.

(b) किं नाम खण्डकाव्यम्? कस्यापि सुप्रसिद्धस्य संस्कृतखण्डकाव्यस्य विवेचना विधेया। 25

What is Khaṇḍa-kāvya? Explain any popular Sanskrit Khaṇḍa-kāvya.

## खण्ड—B / SECTION—B

**5.** सर्वे प्रश्नाः **संस्कृतभाषया** समाधेयाः —

*(a)* पुरुषार्थानां स्वरूपम् आधुनिकसंदर्भे महत्त्वञ्च *200* परिमितेषु शब्देषु प्रतिपाद्यताम्। 10

*(b)* प्राचीन-संस्कृतसाहित्ये वर्णिता प्रशासन-पद्धतिः *200* परिमितेषु शब्देषु विवेचनीया। किं सा अधुना उपयुक्ता? 10

*(c)* षोडशसंस्कारेषु उपनयन-संस्कारस्य स्वरूपं महत्त्वञ्च प्रतिपाद्यताम्। किम् अधुना तेषामुपयोगिता अस्ति? 10

*(d)* जैनधर्मस्य सन्देशः *150* परिमितेषु शब्देषु प्रतिपाद्यताम्। 10

*(e)* 'भारतीयसंस्कृतिः-पाश्चात्यसंस्कृतिश्च' अनयोः को भेदः? 10

**6.** *(a)* सांख्यमतानुसारं 'सत्कार्यवादं' सोदाहरणं विवेचयत। 15

Explain Satkāryavāda with example according to Sāṁkhya Philosophy.

*(b)* अष्टाङ्गयोगस्य अवधारणा *200* परिमितेषु शब्देषु प्रतिपाद्यताम्। आधुनिकयोगेन सह तस्य अस्ति कोऽपि सम्बन्धः न वा? 15

Explain the concept of eight limbs of Yoga in *200* words. Is there any relationship between Aṣṭāṅga Yoga and Modern Yoga?

*(c)* प्राचीन-भारते विज्ञानम् इति विषयमाश्रित्य *300* परिमितेषु शब्देषु निबन्धो लेख्यः। 20

Write an essay in *300* words on Science in Ancient India.

**7.** *(a)* वेदान्तानुकूलम् अज्ञानस्वरूपं *150* परिमितेषु शब्देषु प्रतिपादयत। 15

Explain the concept of Ajñāna according to Vedānta in *150* words.

*(b)* सांख्यदर्शनानुसारं प्रकृति-पुरुषयोः साधर्म्यं वैधर्म्यञ्च *150* परिमितेषु शब्देषु लिख्यताम्। 15

Discuss similarities and differences between Prakṛti and Puruṣa according to Sāṁkhya Philosophy in *150* words.

*(c)* प्राचीन-भारते आयुर्विज्ञानम् इति विषये *250* परिमितेषु शब्देषु निबन्धो लेख्यः। 15

Write an essay in *250* words on Medical Science in Ancient India.

*(d)* शून्यवादस्य कोऽर्थः बौद्धमते? 5

What is Śūnyavāda according to Buddhist Philosophy?

**8.** *(a)* अधः प्रदत्तं सन्दर्भं सम्यग् अधीत्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरी-लिप्यां स्वेन संस्कृतेन दीयताम्। प्रत्येकम् उत्तरं *3–4* पंक्तिषु भवेत्— 5×5=25

सखि! त्रिभुवनोपदेशदानदक्षायास्तव पुरो जिह्वा जिह्रेति मे जल्पन्ती। जानास्येव यादृश्यो विसंस्थुत्वा गुणवत्यपि जने दुर्जनवन्निर्दाक्षिण्यः क्षणभंगिन्यः दुरतिक्रमणीया न रमणीया दैवस्य वामाः वृत्तयः। निष्कारणं च निकारकणिकापि कलुषयति मनस्विनोऽपि मानसमसदृशजनादापतन्ती। अनवरतनयनजलसिच्यमानश्च तरुरिव विपल्लवोऽपि सहस्रधा प्ररोहति। अतिसुकुमारं च जनं संतापपरमाणवो मालतीकुसुममिव ग्लानिमानयन्ति। महतां चोपरि निपतन्नणुरपि सृणिरिव करिणां क्लेशः कदर्थनायालम्। सहजस्नेहपाशबद्धग्रन्थिबन्धनाश्च बान्धवभूता दुस्त्यजाः जन्मभूमयः। दारयति दारुणः क्रकचपात इव हृदयं संस्तुतजन-विरहः।

*(i)* दैवस्य वामाः वृत्तयः कीदृश्यः भवन्ति?

*(ii)* असदृशजनाद् आपतन्ती निकारकणिका किं करोति?

*(iii)* संतापपरमाणवः किं कुर्वन्ति?

*(iv)* जन्मभूमयः कुतः दुस्त्यजाः भवन्ति?

*(v)* संस्तुतजन-विरहः किं करोति?

*(b)* अधः प्रदत्तं सन्दर्भं सम्यग् अवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरी-लिप्यां स्वेन संस्कृतेन दीयताम्। प्रत्येकम् उत्तरं *3–4* पंक्तिषु भवेत्— 5×5=25

सृष्टेरादौ सर्वज्ञेन परमात्मना विश्वकल्याणभावनया सर्वजनसंवेद्यं वेदज्ञानमाविष्कृतम्। मानवसंसृतौ सर्वेऽपि मानवाः स्वस्वपरिवारानुबद्धा एव। परिवार एव मानवसमूहस्य प्रथमा संख्या स्वीकर्त्तव्या। परिवारा एव क्रमशो वृद्धिमुपगताः सन्तो ग्रामरूपेण, नगररूपेण, प्रदेशरूपेण अथ च राष्ट्ररूपेण परिलक्ष्यन्ते। अत एव वेदे परिवारमुद्दिश्य तत्सुखोपायाः अभ्युदयोपायाश्च सम्यक् निर्दिष्टाः। सर्वप्रथमं वैचारिकमैक्यमभीप्सितम्। यत्र पारिवारिकाः परस्परं सौमनस्यं सहभावं सुखदुःखयोः समामनुभूतिं च विभावयन्ति तत्र चिररमणीयो भवति सुखवासः। लोके शक्तिमन्त एव जीवनं धारयन्ति, शक्तिप्रतिष्ठा च सङ्घ एव वर्त्तते। त एव शक्तिमन्तो भवितुमर्हन्ति ये सङ्घे विचरन्ति सङ्घे विश्वसन्ति च। जनाः यदि संगठिताः स्युस्तर्हि तान् कोऽपि पराजेतुं न प्रभवति। सङ्घटनं त्रिभिः परिपुष्टं भवति—सङ्गमेन, संवादेन संविचारेण च।

*(i)* परमात्मना वेदज्ञानं किमर्थमाविष्कृतम्?

*(ii)* मानवजीवने परिवारस्य किं महत्त्वम्?

*(iii)* पारिवारिकमैक्यं कथं स्थापयितुं शक्यते?

*(iv)* शक्तिप्रतिष्ठा कथं प्राप्यते?

*(v)* सङ्घटनशक्त्या किं भवति? कथं च सङ्घटनं क्रियते?

★ ★ ★

# SANSKRIT

## PAPER—I

## ( LITERATURE )

| Time Allowed : Three Hours | Maximum Marks : 250 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in two Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड—A / SECTION—A

1. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

(a) अधोनिर्दिष्टाः सर्वे प्रश्नाः **संस्कृतभाषया** एव *2–3* पंक्तिषु समाधेयाः — 1×10=10

(i) ऋ, श, प-वर्णानाम् उच्चारणस्थानानि लेख्यानि।

(ii) महाप्राणवर्णाः के?

(iii) 'यम्'-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

(iv) 'पद'-शब्दस्य कोऽर्थः संस्कृतव्याकरणे?

(v) 'गङ्गा + ओघः'—सूत्रोल्लेखपुरस्सरं सन्धिकार्यं विधेयम्।

(vi) 'दिग् + पालः'—सूत्रोल्लेखपुरस्सरं सन्धिकार्यं विधेयम्।

(vii) 'हरिर्गच्छति'—सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः कार्यः।

(viii) 'देवदत्तः ग्रामं गच्छति'—वाच्यपरिवर्तनं क्रियताम्।

(ix) 'गङ्गायाः समीपम्'—समासनामोल्लेखपूर्वकं समासो विधीयताम्।

(x) 'नीलोत्पलम्'—विग्रहपूर्वकं समास-नाम लिखत।

(b) अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विभक्तिप्रयोगस्य औचित्यं सूत्रोल्लेखपुरस्सरं **संस्कृतभाषया** *3–4* पंक्तिषु निर्णेयम्— 2×5=10

(i) रामेण वाणेन हतो वाली।

(ii) शिरसा खल्वाटः।

(iii) क्रोशं कुटिला नदी।

(iv) हरये नमः।

(v) पुष्पेषु गन्धः।

(c) अधोलिखितानां सूत्राणाम् अर्थोदाहरणानि **संस्कृतेन** लेख्यानि— 2×5=10

(i) षष्ठी हेतुप्रयोगे।

(ii) ध्रुवमपायेऽपादानम्।

(iii) कर्तुरीप्सिततमं कर्म।

(iv) इको यणचि।

(v) तुल्यास्य-प्रयत्नं सवर्णम्।

(d) अव्ययोपसर्गयोः स्वरूपं विलिख्य तयोर्महत्त्वं प्रस्तूयताम्। 10

(e) काव्यसमीक्षायाम् औचित्यसिद्धान्तस्य स्थानं प्रतिपाद्यताम्। 10

2. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

(a) कति वेदाः? तत्र विषयः कः? किञ्च तेषां महत्त्वम्? स्पष्टीक्रियताम्। 15

How many Vedas are there? What is their subject matter? What is their importance? Explain.

(b) आनन्दवर्धन-मम्मट-विश्वनाथ-पण्डितराजजगन्नाथेषु कस्य काव्यलक्षणं समीचीनं त्वन्मतानुसारेण? कश्च तत्र हेतुः, समीक्ष्यताम्। 15

Explain, with reason, whose definition of Kāvya is more relevant from your point of view among the following—Ānandavardhana, Mammaṭa, Viśwanātha and Paṇḍitarāja Jagannātha.

(c) भाषाविज्ञानस्याध्ययने संस्कृतभाषायाः योगदानं विविच्यताम्। 20

Describe the contribution of Sanskrit language in linguistics studies.

3. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

(a) वाल्मीकि-रामायणे वर्णितस्य मर्यादापुरुषोत्तमस्य रामस्य कथा किं सर्वैः (हिन्दु-जैन-बौद्धैः) समानरूपेण स्वीकृता? व्याख्यायताम्। 15

Has the story of Maryādā-Puruṣottama Rāma as described in Vālmīki *Rāmāyaṇa* been equally accepted in different religions (Hindu, Jaina and Bauddha)? Present your viewpoint.

(b) महाभारतं किमैतिहासिकं महाकाव्यम्? ऐतिहासिकमहाकाव्यपरम्परा संस्कृतसाहित्ये कीदृशी, विविच्यताम्। 10

Is *Mahābhārata* a historic Mahākāvya? Discuss how the Sanskrit literature evolved since *Mahābhārata*.

(c) ''उपमा कालिदासस्य'' भणितिरियं सोदाहरणं समीक्ष्यताम्। 10

''उपमा कालिदासस्य''—Examine critically this statement with examples.

(d) ''गद्यं कवीनां निकषं वदन्ति'' भणितिरियं किं समीचीना? के प्रमुखाः गद्यकाव्यकाराः संस्कृतसाहित्ये? प्रतिपादयत। 15

''गद्यं कवीनां निकषं वदन्ति''—Is this statement true? Who are the famous authors of Gadyakāvyas in Sanskrit literature? Describe.

4. अधोलिखिताः सर्वे प्रश्नाः समाधीयताम्—

(a) रूपकस्य लक्षणं विलिख्य कस्याप्येकस्य संस्कृत-रूपकस्य समीक्षा विधीयताम्। 15

Define Roopaka and describe any Sanskrit Roopaka of your choice.

(b) "शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते।
शिला-भट्टारिका-वाचि बाणोक्तिषु च सा यदि॥"

महाकविराजशेखरस्य इयमुक्तिः किं समीचीना? समीक्ष्यताम्। 15

Is the following statement of Mahākavi Rājaśekhara correct? Discuss.

"शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते।
शिला-भट्टारिका-वाचिं बाणोक्तिषु च सा यदि॥"

(c) "गुणाढ्यस्य **बृहत्कथामाश्रित्य** क्षेमेन्द्रेण **बृहत्कथामञ्जरी** लिखिता सोमदेवेन च **कथासरित्सागरः** विरचितः।" एतेषां किं महत्त्वं संस्कृतकथासाहित्यशास्त्रे? 20

"Kṣemendra's *Bṛhatkathāmañjarī* and Somadeva's *Kathāsaritsāgara* are based on Guṇāḍhya's *Bṛhatkathā*." Describe the importance of these Kāvyas in Sanskrit Kathā (story) literature.

## खण्ड—B / SECTION—B

5. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया *150* परिमितेषु शब्देषु समाधेयाः —

(a) 'भारतीय-स्थापत्यकला' इति विषयमाश्रित्य एकः निबन्धः संस्कृतेन लिख्यताम्। 10

(b) जैनदर्शने प्रतिपादितम् 'अनेकान्तवाद'-सिद्धान्तः वैशद्येन विवेच्यताम्। 10

(c) षोडश संस्काराणां मानव-जीवने किं महत्त्वं, विज्ञानचिन्तनपुरस्सरं प्रतिपाद्यताम्। 10

(d) "प्राचीन-भारतीय-यन्त्रविज्ञानमाश्रित्य आधुनिकविज्ञानमाविष्कृतम्" किमिदं कथनं समीचीनम्? स्वविचारान् संस्कृत-माध्यमेन लिखत। 10

(e) 'ऋणं कृत्वा घृतं पिबेत्' इति केषां विचारः कश्चास्य अभिप्रायः, विस्तरेण समालोच्यताम्। 10

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

(a) 'ब्रह्माद्वैतवाद'स्य सिद्धिर्कथं भवति? बन्ध-मोक्षव्यवस्था व्यक्तिस्वातन्त्र्यञ्च कथं सम्भवति, प्रतिपाद्यताम्। 15

How can you establish 'ब्रह्माद्वैतवादः'? Describe how Bandha, Mokṣa and freedom of soul are possible.

(b) "बध्यते मुच्यते च नानाश्रया प्रकृतिः"—कथनमिदं सांख्यमतानुसारं विविच्यताम्। 15

Explain the following statement according to Sāṁkhya Philosophy :

"बध्यते मुच्यते च नानाश्रया प्रकृतिः।"

(c) प्राचीन-भारते चिकित्सा-विज्ञानं कीदृशमासीत्? सप्रमाणं विवेच्यताम्। 20

What was the condition of Medical Science in ancient India? Explain with proof.

7. अधोलिखिताः सर्वे प्रश्नाः समाधीयताम्—

(a) भारतीयदर्शनेषु ईश्वरस्वरूपमाश्रित्य निबन्धमेकं विलिख्यताम्। 15

What is the concept of the God described and accepted in Indian Philosophy? Write an essay.

(b) 'न्यायदर्शने प्रमाणव्यवस्था' विशदयत। 15

Explain Epistemology in Nyāya Philosophy.

(c) चतुर्विधपुरुषार्थस्य व्यवस्था कीदृशी भारतीयसंस्कृतौ? 'काम'-पुरुषार्थस्य का आवश्यकता? तत्र तु जीवानां प्रवृत्तिः स्वत एव। 10

What are the four types of Puruṣārtha in Indian culture? Why is Kāma (sex) included as a Puruṣārtha when it is a natural behaviour of living beings?

(d) मीमांसादर्शनस्य के सिद्धान्ताः? सम्यक् समीक्ष्यताम्। 10

What are the principles of Mīmāṁsā Philosophy? Explain.

8. (a) अधोलिखित-संदर्भं सम्यगवधार्य तदधस्तात् प्रदत्तानां प्रश्नानामुत्तरं देवनागरीलिप्यां स्वेन संस्कृतेन दीयताम्। प्रत्येकमुत्तरं 3–4 पंक्तिषु भवेत्— 5×5=25

ततो जलाद् बहिरागत्य तिन्तिडीशाखात् उत्तार्य शुष्कवस्त्रे परिधाय, इतस्ततः पर्यट्यापि च कां भूमिमायातौ—इति निश्चेतुं नापारयावः। तावदकस्माद् दृष्टं यद् उत्तरतः खुरधूलिभिः पार्श्वपरिवर्त्ति-लता-कुसुम-परागान् द्विगुणयन्तं वीरवेशः कश्चिच्छ्यामो युवा समायातीति। स च क्षणेनैवाऽऽगत्य, नौ सकलं वृत्तान्तं पृष्ट्वा, विज्ञाय च प्रावोचत्—"अवगतम्, भवतोरेव विषये दृष्टस्वप्नः शिववीरो भवन्तौ स्मरति। तत्सपद्यश्वावारुह्य आगम्यताम्, न वा भयं किमपि, व्यतीतो भवतोर्दुःखमयः समयः" इति। ततः साश्चर्यं सपदि शिववीरं साक्षात्कृत्यावगतं यदेष एव महात्मा भटवेषेणास्मिन्निकटे भीमा-नद्यास्तटं गत आसीदिति। तत्कालमारभ्याद्यावधि तस्यैव कर-कमलच्छायायां वसावः। भगिनीवियोग-तापश्चिरादासीत्, सोऽप्यद्य निवृत्तः।

(i) वीरवेशः कः आसीत्? कीदृशश्च सः?

(ii) भीमा-नद्यास्तटं गत्वा भटवेषेण किं कथितम्?

(iii) भगिनीवियोगदुःखितौ कौ? कीदृशौ तौ?

(iv) शुष्कवस्त्रे कुत्र आस्ताम्?

(v) जलाद्बहिरागत्य अकस्मात् किं दृष्टम्?

(b) अधः प्रदत्तं सन्दर्भं सम्यगधीत्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्यां स्वेन संस्कृतेन दीयताम्। प्रत्येकम् उत्तरं *3–4* पंक्तिषु भवेत्— 5×5=25

यद्यपि भारतीय-संस्कृतौ सद्व्यवहारस्य सदाचरणस्य च भूरि भूरि प्रशंसा समुपलभ्यते तथापि शठतामेव सर्वोपरि साधनरूपेण मन्यमानानां कुटिलानां पराजयार्थमद्य 'आर्जवं हि कुटिलेषु न नीतिः' इति मत्वा तेषां प्रति विधीयमाना कुटिलता न नीतिविरुद्धो धर्म इति। यदि भगवता श्रीमोहिन्याः स्वरूपं न कृतं स्यात् तर्हि कथं दैत्यान् आकृष्य अमृतोत्पादनसमये सुधां संगृह्य देवरक्षा कृता स्यात्। कंसस्य पिता उग्रसेनः महात्मा आसीत् परन्तु तस्य साधुता कंसवशीकर्तुं विफला जाता। कुटिलाः जनाः कुटिलव्यवहारेण वशे आयान्ति नान्यथा। अद्य आतंकवादिनाः कुटिलव्यवहारेण भारतीय-सज्जन-जनान् घातयन्ति। अतः अद्य किं करणीयमिति विचारणीयो विषयः। विवेचनस्य अस्य नायं निष्कर्षः यत् साधुता हेया।

*(i)* किं साधुता सर्वथा हेतव्या?

*(ii)* आर्जवतायाः परित्यागः केन किमर्थं कृतः?

*(iii)* कस्य प्रशंसा समुपलभ्यते?

*(iv)* कुटिलाः जनाः कथं पराभवन्ति?

*(v)* अद्य आतंकवादिभिः सह कीदृशः व्यवहारः करणीयः?

★ ★ ★

CS (MAIN) Exam:2016

वियोज्यम् DETACHABLE

# संस्कृतम् (प्रथमं प्रश्नपत्रम्)
## (साहित्यम्)

0000105

# SANSKRIT (Paper I)
## (LITERATURE)

*समयः होरात्रयम् (घंटा-त्रयम्)*
*Time Allowed : Three Hours*

*पूर्णांकाः 250*
*Maximum Marks : 250*

### प्रश्नपत्र-संबन्धिताः विशेषनिर्देशाः

कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः

**खण्डद्वयेषु** विभाजिताः **अष्ट-प्रश्नाः** ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

प्रश्नसंख्या **1** तथा **5** अनिवार्यौ । शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम् । तत्र प्रत्येकखंडात् **एकम् अवश्यं** करणीयम् ।

प्रत्येक-प्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः ।

प्रश्नसंख्या **1, 5** तथा **8 संस्कृतभाषयैव** समाधेयाः । शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा परीक्षासमित्या स्वीकृत-भाषया करणीयम् ।

संस्कृतभाषा देवनागरी-लिप्यामेव लेखनीया ।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । यदि उत्तरपुस्तिकायां कोपि पृष्ठः रिक्तः (अलिखितः) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (╳) विधेया ।

अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत् ।

### QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1, 5** and **8** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answer written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्डः 'A' SECTION 'A'

**1.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः ।
Answer all of the following : (To be written in Sanskrit language)

**1.**(a) अधोनिर्दिष्टाः सर्वे प्रश्नाः **संस्कृतभाषया** एव 2-3 पंक्तिषु समाधेयाः — 1×10=10

(i) 'लृ, ञ, न'— वर्णानाम् उच्चारणस्थानानि लेख्यानि ।

(ii) ऊष्मवर्णाः के ?

(iii) 'खय्'– प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः ।

(iv) का 'संहिता'-संज्ञा ? (सूत्रं देयम्)

(v) 'रवावुदिते'— सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः कार्यः ।

(vi) 'यदि + अपि'— सूत्रोल्लेखपुरस्सरं सन्धिकार्यं विधेयम् ।

(vii) 'दिक् + नागः'— सूत्रोल्लेखपुरस्सरं सन्धिकार्यं विधेयम् ।

(viii) 'पुरुषः सिंह इव'— समासनामोल्लेखपूर्वकं समासो विधीयताम् ।

(ix) 'एकोनः'— विग्रहपूर्वकं समास-नाम लिखत ।

(x) 'समवेता जना दुर्गाप्रतिमां पश्यन्ति'— वाच्यपरिवर्तनं क्रियताम् ।

**1.**(b) अधस्तनेषु वाक्येषु रेखाङ्कितपदानां विभक्तिप्रयोगस्य औचित्यं सूत्रोल्लेखपुरस्सरं **संस्कृतभाषया** 3-4 पंक्तिषु निर्णयम् — 2×5=10

(i) <u>तण्डुलान्</u>ओदनं पचति ।

(ii) <u>अक्ष्णा</u> काणोऽयमायाति ।

(iii) <u>मातु</u>र्निलीयते कृष्णः ।

(iv) <u>अर्थस्य</u> हेतोर्वसति ।

(v) <u>छात्रेषु</u> मैत्रः पटुः ।

**1.**(c) अधोलिखितानां सूत्राणाम् अर्थोदाहरणानि **संस्कृतेन** 3-4 पंक्तिषु लेख्यानि — 2×5=10

(i) अदर्शनं लोपः ।

(ii) सुप्तिङन्तं पदम् ।

(iii) वृद्धिरादैच् ।

(iv) अतिरतिक्रमणे च ।

(v) भीत्रार्थानां भयहेतुः ।

**1.**(d) का अपश्रुतिः ? संस्कृते अपश्रुतीनां प्रयोगवैशिष्ट्यं सोदाहरणं **संस्कृतेन** निरूपणीयम् ।
(150 शब्दपरिमितम्) 10

**1.**(e) किं नाम चम्पूकाव्यम् ? कस्याप्येकस्य चम्पूकाव्यस्य वैशिष्ट्यं **संस्कृतेन** विचार्यताम् ।
(150 शब्दपरिमितम्) 10

2. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following : —

2.(a) नामपद-क्रियापदयोः रूपप्रयोगवैचित्र्यमवलम्ब्य वैदिकसंस्कृतस्य प्रकृतिः वर्ण्यताम् । (200 शब्दपरिमितम्)

Describe the nature of Vedic Sanskrit on the basis of the distinctive usage of the noun and verb word-forms. (200 words) 15

2.(b) लौकिकसंस्कृतस्य प्रमुखाः विशेषताः विचार्यताम् । (200 शब्दपरिमितम्)

Bring forth the main characteristics of the Classical Sanskrit. (200 words) 15

2.(c) भाषाविज्ञानदृशा संस्कृतस्य महत्त्वं निरूप्यताम् । (250 शब्दपरिमितम्)

Discuss the importance of Sanskrit with regard to the Linguistics. (250 words) 20

3. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following : —

3.(a) 'वाक्यं रसात्मकं काव्यम्' — अस्य भावार्थः सोपपत्तिकं सोदाहरणं विशदीकरणीयः । (200 शब्दपरिमितम्)

Examine critically with illustrations the meaning of 'वाक्यं रसात्मकं काव्यम्'. (200 words) 15

3.(b) काव्यात्मविषये संस्कृतकाव्यशास्त्रे कति सम्प्रदायाः सन्ति ? तद्विचारचर्चा संक्षेपेण विधीयताम् । (200 शब्दपरिमितम्)

How many schools are there in Sanskrit poetics regarding soul of poetry ? Discuss them briefly. (200 words) 15

3.(c) 'कादम्बरी-रसभरेण समस्त एव ...' — भणितिरियं सोदाहरणं समीक्ष्यताम् । (150 शब्दपरिमितम्)

Elucidate with illustrations the saying : 'कादम्बरी-रसभरेण समस्त एव ...'. (150 words) 10

3.(d) अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य किं तद् वैशिष्ट्यं येनासौ श्रेष्ठोऽङ्कः स्वीक्रियते ? संक्षेपेण विचार्यताम् । (150 शब्दपरिमितम्)

What is the distinction of the fourth act of Abhijñānaśākuntala, by which it is called the best act ? Discuss briefly. (150 words) 10

4. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following : —

4.(a) 'भारतामृतसर्वस्वं गीता' — भणितिरियं सोदाहरणं समीक्ष्यताम् । (250 शब्दपरिमितम्)

Explain with illustrations the saying — 'भारतामृतसर्वस्वं गीता'. (250 words) 20

4.(b) केचित्तु वदन्ति 'माघे सन्ति त्रयो गुणाः' । किमौचित्यमस्य कथनस्य ? विचार्यताम् ।
(200 शब्दपरिमितम्)

Some state 'माघे सन्ति त्रयो गुणाः'. What is the propriety of this statement ? Discuss.
(200 words) 15

4.(c) कैश्चिदालोचकैः 'मेघदूतं प्रकृतेः चित्रवीथी अस्ति' इति उक्तम् ।
अस्य कथनस्य किं तात्पर्यमिति सोदाहरणं समीक्ष्यताम् । (200 शब्दपरिमितम्)
Some critics have stated 'Meghadūta is the picture-gallery of Nature'. What is the meaning of this statement ? Discuss with examples. (200 words) 15

## खण्डः 'B' SECTION 'B'

5. अधोलिखिताः सर्वे प्रश्नाः **संस्कृतभाषया** समाधेयाः । (150 शब्दपरिमितम्)
Answer all of the following : (To be written in Sanskrit language) (150 words)

5.(a) 'अर्थ एवैकः पुरुषार्थः'— इति विषयमधिकृत्य निबन्धमेकं **संस्कृतेन** विरचयत । 10

5.(b) 'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः'— इति वचनं सोदाहरणं **संस्कृतेन** समीक्ष्यताम् । 10

5.(c) 'अयमात्मा ब्रह्म' — इत्यौपनिषदिकवचनं सम्यक्तया निरूप्य 'अद्वैत'-वेदान्तमतं **संस्कृतेन** प्रस्तूयताम् । 10

5.(d) 'नास्ति योगसमं बलम्' — इति कथनं वैशद्येन **संस्कृतभाषया** विवेच्यताम् । 10

5.(e) 'वेदस्य हि षट्स्वङ्गेषु ज्योतिषमन्यतमम्'— इति विषयमवलम्ब्य निबन्धमेकं **संस्कृतेन** विलिखत । 10

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —
Answer all of the following : —

6.(a) प्राचीनभारते सङ्गीतकलायाः विकासस्य रूपरेखा चित्रणीया । (250 शब्दपरिमितम्)
Sketch an outline of the development of the musical art in ancient India.
(250 words) 20

6.(b) 'मानाधीना मेयसिद्धिः' — इति न्यायेन न्यायदर्शने प्रमाणव्यवस्थां विशदयत ।
(200 शब्दपरिमितम्)

Elucidate the doctrine of Pramāna in Nyāya philosophy according to the nyāya. 'मानाधीना मेयसिद्धिः'. (200 words) 15

6.(c) 'चोदनालक्षणोऽर्थो धर्मः' सूत्रमिदं मीमांसामतानुसारं विविच्यताम् । (200 शब्दपरिमितम्)
Explain the sūtra 'चोदनालक्षणोऽर्थो धर्मः' according to the theory of Mīmāṁsā.
(200 words) 15

7. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —
Answer all of the following : —

7.(a) वास्तुशास्त्र-विज्ञानक्षेत्रे किं प्राचीनयुगमतिशेते वर्तमानयुगम् ? सुष्ठु निरूप्यताम् ।
(200 शब्दपरिमितम्)

Does the modern age surpass the old age in the sphere of architecture ? Examine properly. (200 words) 15

7.(b) 'चैतन्यविशिष्टदेह एवात्मा' — इत्येतद् चार्वाकमतं विशदयत । (150 शब्दपरिमितम्)
Clarify the opinion of the Cārvāka philosophy on 'चैतन्यविशिष्टदेह एवात्मा'.
(150 words) 10

7.(c) भारतीयदर्शने कारण-कार्यभावमाश्रित्य निबन्धमेकं विलिखत । (200 शब्दपरिमितम्)
Write an essay on the cause and effect (कारण-कार्य) theory in Indian philosophy.
(200 words) 15

7.(d) वैशेषिकदर्शनाभिमतस्य 'विशेष'-पदार्थस्य स्वरूपं प्रदर्श्य दर्शनक्षेत्रे तस्योपयोगित्वं निर्णेयम् ।
(150 शब्दपरिमितम्)

Shed a light on the 'Viśeṣa' substance in accordance with the Vaiśeṣika philosophy and judge its utility in the field of philosophy. (150 words) 10

8. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —
Answer all of the following : (To be written in Sanskrit language)

8.(a) अधोलिखित-सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्यां **स्वेन संस्कृतेन** दीयताम् । प्रत्येकमुत्तरं 3-4 पंक्तिषु भवेत् — 5×5=25

'समाज'-इत्येतत् पदमात्मनि नितान्तव्यापकमर्थं निधाय पदजगति संशोभते । सर्व एव मानवीयाः सम्बन्धाः संस्थाश्च 'समाज'-इत्येतेन नामधेयेन व्यवह्रियन्ते । न मनुष्योऽस्ति प्रकृत्योपरतानुरागी । सः स्वजीवनं गोपायितुं स्वभावनावलिं तोषयितुं स्वव्यक्तित्वञ्च संवर्द्धयितुं समाजमध्यास्ते । जनुरारभ्योपरामपर्यन्तं स्वकीयं प्रत्येकमभिलाषं पूरयितुं परमालम्बते सः । नैतदिह विस्मरणीयं यत् स एव मानवसमवायः 'समाज'-इत्येतां संज्ञां भजते यत्र सौहृदमय-शान्ति-शुचिजीवन-यापनानुरागो जागर्ति । न चाकस्मादेव सञ्जातो जनसंमर्दः कदापि 'समाज'-इत्यभिधीयते । समाजस्योद्भवस्तु तदा जायते यदा विशाले जननिवहे पारस्परिकसहयोगपूर्वक-जीवनवहनकामनासंघर्षशून्यप्रेमपूतजीवन-दिदृक्षा समोदं समुत्थिता भवति । मनुष्यस्य प्रकृतिरेवास्तीदृशी यत् सा शान्तिं मृगयते; आनन्दमन्विष्यति; न सा एकाकितायां रमते; न तस्यै विविक्तता रोचते । अतः पारस्परिकस्नेह-सहानुभूतिमयजीवनोज्ज्वलजनसमुदाय एव 'समाज'-शब्दस्य भवति वाच्योऽर्थः ।

(i) कोऽयं समाजः ?

(ii) मनुष्यः किमर्थं समाजमध्यास्ते ?

(iii) कोऽयं मानवसमवायः 'समाज'-इत्येनां संज्ञां भजते ?

(iv) समाजस्योद्भवः कदा जायते ?

(v) मनुष्यस्य प्रकृतिः कीदृशी अस्ति ?

**8.** (b) अधोलिखित-सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरी-लिप्यां **स्वेन संस्कृतेन** दीयताम् । प्रत्येकमुत्तरं 3-4 पंक्तिषु भवेत् — 5×5=25

भारतीयदर्शनसाहित्ये सन्ति त्रयः प्रस्थानग्रन्थाः । ते वेदान् अवलम्बमाना मानवजीवनस्य चरमं लक्ष्यं तत्प्राप्तिसाधनञ्चोपदिशन्ति । भारतीयविचारशास्त्रस्य श्रेष्ठोपजीव्यग्रन्थत्वात् उपनिषदः प्रस्थानत्रय्यां प्रथमप्रस्थानत्वेन गृह्यन्ते । उपनिषदः पराविद्येतिपदेन व्यपदिश्यन्ते । 'ब्रह्मविद्या'-इत्येतया अपरया च संज्ञया सुविदितास्ता विदुषां संसारे । तासु महर्षयः आध्यात्मिक्या विद्याया गूढतमानां रहस्यानां विशदतया विचारं कुर्वाणाः प्राप्यन्ते । श्रीमद्भगवद्गीता द्वितीयं प्रस्थानमिति कथ्यते । सा श्लोकानां सप्तशत्या निःश्रेयसाधिगमनस्योपायान् सुबोधायां भाषायामभिव्यनक्ति । बादरायणप्रणीतं ब्रह्मसूत्रं तृतीयप्रस्थानमस्ति । तत्र आपाततो विरोधिभूतानामुपनिषद्वाक्यानां समन्वयस्तथा कृतो येन ज्ञातं स्यात् तेषां सर्वेषामपि वाक्यानां ब्रह्मनिष्ठत्वमथ च तत्र तार्किकाणां युक्तयोऽपि प्राबल्येन निराकृताः सन्ति ।

(i) भारतीयदर्शनसाहित्ये कति प्रस्थानग्रन्थाः ? के च ते ? कश्च तेषाम् उपदेशः ?

(ii) किं पराविद्येतिपदेन व्यपदिश्यते ? का चाऽपरा संज्ञा ?

(iii) गीतायां कति श्लोकाः ? कश्च तेषां वर्ण्यविषयः ?

(iv) बादरायणप्रणीतब्रह्मसूत्रे किं वर्णितमस्ति ?

(v) को वर्ण्यविषय उपनिषदाम् ?

CS (MAIN) Exam : 2017

वियोज्य DETACHABLE

# संस्कृतम् (प्रथमं प्रश्नपत्रम्)
## (साहित्यम्)

# SANSKRIT (Paper I)
## (LITERATURE)

| | |
|---|---|
| समयः होरात्रयम् (घंटा-त्रयम्)<br>*Time Allowed : Three Hours* | पूर्णांकाः 250<br>*Maximum Marks : 250* |

## प्रश्नपत्र-संपृक्ताः विशेषनिर्देशाः

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः ।**

**खण्डद्वयेषु** विभाजिताः **अष्ट-प्रश्नाः** ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये । शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम् । तत्र प्रत्येकखंडात् **एकम् अवश्यं** करणीयम् ।

प्रत्येक-प्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः ।

प्रश्नसंख्या **1, 5** तथा **8 संस्कृतभाषयैव** समाधेयाः । शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा प्रवेशपत्रे स्वीकृत-भाषया करणीयम् । संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया ।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया । अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति ।

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions.**

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1, 5** and **8** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answer written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

# खण्डः 'A'  SECTION 'A'

**1.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः ।
Answer all of the following : (To be written in Sanskrit language) 1×10=10

**1. (a)** अधोनिर्दिष्टाः सर्वे प्रश्नाः **संस्कृतभाषया** 2-3 पंक्तिभिः समाधेयाः —

(i) 'ए, भ, व'– वर्णानाम् उच्चारणस्थानानि लेख्यानि ।
(ii) का वृद्धिसंज्ञा ? वृद्धिसंज्ञा-विधायकं सूत्रं लिख्यताम् ।
(iii) 'झश्'– प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः ।
(iv) 'संयोग'-संज्ञा-स्वरूपं स्पष्टीक्रियताम् ।
(v) 'गुरु+आदेशः'– सूत्रोल्लेखपूर्वकं सन्धिकार्यं विधेयम् ।
(vi) 'वाङ्मयम्'– सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः कार्यः ।
(vii) 'प्राचार्यः'– विग्रहपूर्वकं समासनाम लिखत ।
(viii) 'रूपवती भार्या यस्य सः'– समासनामोल्लेखपूर्वकं समासो विधीयताम् ।
(ix) 'सर्वे जनाः सुखिनः भवन्तु' – वाच्यपरिवर्तनं क्रियताम् ।
(x) 'बालकाः मां पश्यन्ति'– वाच्यपरिवर्तनं क्रियताम् ।

**1. (b)** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विभक्तिप्रयोगस्य औचित्यं सूत्रोल्लेखपूर्वकं **संस्कृतभाषया** निर्णेयम् — 2×5=10

(i) <u>गां</u> दोग्धि पयः ।
(ii) स <u>फलेभ्यः</u> याति ।
(iii) <u>कामात्</u> क्रोधोऽभिजायते ।
(iv) विद्यार्थी <u>अध्ययनेन</u> वसति ।
(v) <u>रामे</u> वनं गते दशरथः प्राणान् तत्याज ।

**1. (c)** अधोलिखितानां सूत्राणाम् अर्थोदाहरणानि **संस्कृतेन** 3-4 पंक्तिभिः लेख्यानि — 2×5=10

(i) मुखनासिकावचनोऽनुनासिकः ।
(ii) लोपः शाकल्यस्य ।
(iii) कर्तुरीप्सिततमं कर्म ।
(iv) उपपदमतिङ् ।
(v) हशि च ।

**1. (d)** संस्कृतभाषायाः सन्धि-प्रक्रियाम् आश्रित्य ध्वनि-परिवर्तन-व्याख्यानं संस्कृतेन प्रस्तूयताम् । 10

**1. (e)** संस्कृत-गीतिकाव्य-परम्परायाः सम्यक् समीक्षणं विधीयताम् । 10

**2.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —
Answer all of the following : —

**2. (a)** वैदिकसंस्कृत-लौकिकसंस्कृतयोः साम्यं वैषम्यं च सम्यक् विविच्यताम् ।
Explain aptly the similarities and dissimilarities between Vedic Sanskrit and Classical Sanskrit languages. 20

**2. (b)** भाषाविज्ञानाय पाणिनेर्वैयाकरणस्य योगदानं प्रकाश्यताम् ।
Throw light on the contribution of the grammarian Panini to linguistics. 15

**2. (c)** संस्कृत-काव्यशास्त्रे प्रतिपादितानि काव्यप्रयोजनानि विवेचयत ।
Explain Kāvya-prayojanāni as mentioned in Sanskrit poetics. 15

**3.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —
Answer all of the following : —

**3. (a)** काव्यात्म-विवेचन-सन्दर्भे ध्वनिसिद्धान्तस्य प्रतिपादनं समीचीनतया विमृश्यताम् ।
Elucidate the doctrine of Dhvani properly with reference to discussion on the soul of poetry. 20

3. (b) रामायण-महाभारतयोः तुलनात्मकं विवेचनं विधीयताम् ।

Establish a comparative interpretation between Ramayana and Mahabharata. 15

3. (c) लक्षणायाः स्वरूपं सोदाहरणं प्रतिपाद्यताम् ।

Explain with examples characteristics of 'Lakshanā'. 15

4. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following : —

4. (a) बृहत्त्रयी-महाकाव्यानां विविधाः विशेषताः तुलनात्मकरूपेण विचारणीयाः ।

Explain comparatively various characteristics of Brihattrayī-Mahākāvyas. 20

4. (b) 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' सदुक्तिरियं सम्यक् समीक्ष्यताम् ।

Explain properly the good saying 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' । 15

4. (c) बाण-काव्यविषये 'बाणोच्छिष्टं जगत् सर्वम्' इति भणितिः विमर्शनीया ।

Elucidate the saying 'बाणोच्छिष्टं जगत् सर्वम्' about the poetry of Bāṇa. 15

## खण्डः 'B' SECTION 'B'

5. अधोलिखिताः सर्वे प्रश्नाः **संस्कृतभाषया** समाधेयाः । (150 शब्दैः)

Answer all of the following : (To be written in Sanskrit language) (150 words)

5. (a) धर्मपुरुषार्थमाश्रित्य निबन्धमेकं संस्कृतेन लिख्यताम् । 10

5. (b) षोडशसंस्कारेषु विवाहसंस्कारस्य स्वरूपं महत्त्वं च प्रतिपादयत । 10

5. (c) भारतीयजीवनपद्धतौ ब्रह्मचर्याश्रमस्य महत्त्वं निरूपणीयम् । 10

5. (d) प्राचीनभारते मूर्तिकलायाः विकासं प्रकाशयत । 10

5. (e) पुरातनभारते वास्तुविज्ञानम् इत्यधिकृत्य एकः लेखः लेखनीयः । 10

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following : —

6. (a) विविधानां भारतीयदर्शनानां मतान्याश्रित्य सृष्टिरचनास्वरूपं निरूपणीयम् ।

Analyse the form of creation according to opinions of different Indian philosophies. 20

6. (b) योगदर्शनानुसारम् अष्टाङ्गिको योगः सुष्ठु प्रतिपाद्यताम् ।

Discuss well the eight types of yoga according to yoga philosophy. 15

6. (c) बौद्धदर्शन-प्रतिपादितं प्रतीत्यसमुत्पादवादं विशदयत ।

Clarify the theory of 'प्रतीत्यसमुत्पाद' as propagated in Bauddha philosophy. 15

7. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following : —

7. (a) वेदान्तदर्शनानुरूपं 'ब्रह्म सत्यं जगन्मिथ्या' इति वचनं व्याख्यायताम् ।

Explain 'ब्रह्म सत्यं जगन्मिथ्या' in accordance with Vedanta philosophy. 20

7. (b) श्रीमद्भगवद्गीता-प्रतिपादितः कर्मयोगः निबन्धरूपेण स्पष्टीक्रियताम् ।

Elucidate the theory of 'Karmayoga' as propagated in Shrimad-Bhagavadgita, in an essay form. 15

7. (c) 'प्राचीनभारते सैन्यविज्ञानस्य विकासः' इत्यधिकृत्य एका टिप्पणी लेख्या ।

Write a note on 'The Development of Military Science in Ancient India'. 15

**8.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतेन समाधेयाः —

Answer all of the following : (To be written in Sanskrit language)

**8. (a)** अधोलिखित-सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम् । प्रत्येकमुत्तरं 3-4 पंक्तिभिः भवेत् — 5×5=25

कविशब्दस्य मौलिको व्यापकश्चार्थोऽस्ति 'इन्द्रियगोचरतत्त्वानां साक्षात्कर्ता पुरुषः' इति । 'कवयः क्रान्तदर्शिनः' इति निरुक्तशास्त्रोक्तिः । ऋषिशब्दस्यापि अयमेव महत्त्वपूर्णोऽर्थः । अध्यात्म-शास्त्रमर्मज्ञस्य विदुषः प्राचीनमभिधानं 'कविः' इत्येवास्ति । एतस्मिंश्चैवार्थेऽस्य शब्दस्य प्रयोगो न केवलं गीतायाम् उपनिषत्स्वेवोपलभ्यते प्रत्युत संहितास्वपि महनीयोऽयं शब्द एतस्मिन्नेवार्थे बहुलं प्रयुज्यमान उपलभ्यते । उक्तं हि कठोपनिषदि —

''क्षुरस्य धारा निशिता दुरत्यया । दुर्गं पथस्तत् कवयो वदन्ति ॥''

इदं चापि विशेषतो ध्येयं यत् परब्रह्मार्थे कविशब्दप्रयोगो बहुत्र समुपलभ्यते, यथा ईशावास्योपनिषदि —

''कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः ।''

उपनिषदां स्वरे एव स्वं स्वरं मेलयन्ती श्रीमद्भगवद्गीताऽपि गायति —

''कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद् यः ।''

(i) 'कवि'शब्दस्य मौलिकः अर्थः कः ?

(ii) 'कवि'शब्दस्य अध्यात्मशास्त्रमर्मज्ञरूपः अर्थः कुत्र कुत्र उपलभ्यते ?

(iii) कठोपनिषदि दुर्गमः अध्यात्ममार्गः केन उपमितः अस्ति ?

(iv) ईशावास्योपनिषदनुसारेण परब्रह्मरूपः कविः किमकरोत् ?

(v) गीतायां कवेः स्वरूपं कीदृशं मतम् ?

**8. (b)** अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम् । प्रत्येकमुत्तरं 3-4 पंक्तिभिः भवेत् — 5×5=25

उक्तं हि मेघदूते कालिदासेन —

''कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा ।
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥''

संसारे नियमितरूपेण मानव-जीवन-दशा-परिवर्तनं जायते । 'कुटिलं गच्छतीती जगत्', 'सम्यक् सरतीति संसारः', इति संज्ञाशब्दावपि परिवर्तन-प्रवृत्ति-परिपोषकौ स्तः । एकदा जनः धनधान्यसमृद्धः सन् विविधान् भोगान् भुञ्जानोऽन्यानपि भूयसोऽतिथीन् दीनान् पालयितुं प्रभवति । अन्यदाऽसावेव निःस्वतामुपसन्नो यवानां प्रसृतयेऽप्यन्यदीयद्वारमासादयति । धर्मपुत्रं गविष्ठिरं युधिष्ठिरं को न वेत्ति । यो ह्येकदा सहस्रशोऽतिथीन् सौवर्णपात्रेषु भोजयति, स एवैकदा वैराटं निकेतनमासाद्य त्रिदण्डधारणं विधत्ते, प्रहरिकृत्यं प्रचालयति । गाण्डीव-टङ्कार-सभीकीकृतभटो धनञ्जयोऽपि एकदा वीर-वृन्द-विक्रान्त-विग्रहोऽविद्यत, तथा चासावेव पुमानपि स्त्रीव नटी-कर्म कुर्वाणोऽतिवाहयति जीवनम् । महाराजो हरिश्चन्द्रोऽपि एकदा यदा धनदान-मानादितोषेण क्षुत्पिपासाकुलान् अभ्यागतान् अजीवयत्, स एव चाण्डाल-निकेतनमासाद्य तदादेशं शिरसि निदधानः श्मशानसेवां विधत्ते । अतः सत्यमेवोक्तं ''चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ।''

(i) मेघदूतानुसारं दशा-परिवर्तनं कथं भवति ?

(ii) जगत्-संसार-शब्दयोः कः अभिप्रेतार्थः ?

(iii) युधिष्ठिर-जीवने दशा-परिवर्तनं कथं जातम् ?

(iv) दुर्दिनेषु आगतेषु अर्जुनः कथं जीवनं यापयामास ?

(v) हरिश्चन्द्रः किं कुर्वाणः दुःखदिनानि सेहे ?

**EGT–P–SNKT**

# संस्कृतम्

प्रथमं प्रश्नपत्रम्

( साहित्यम् )

| समयः होरात्रयम् (घंटा-त्रयम्) | पूर्णाङ्काः 250 |
|---|---|

**प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वयेषु** विभाजिताः **अष्ट**-प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रश्नसंख्या **1** तथा **5** अनिवार्यै। शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम्। तत्र प्रत्येकखण्डात् **एकम्** अवश्यं करणीयम्।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः।

प्रश्नसंख्या **1**, **5** तथा **8** **संस्कृतभाषयैव** समाधेयाः। शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा **प्रवेशपत्रे** स्वीकृत-भाषया करणीयम्। संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया। अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति।

# SANSKRIT

## PAPER—I

## ( LITERATURE )

| Time Allowed : Three Hours | Maximum Marks : 250 |
|---|---|

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड—A / SECTION—A

**1.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

*(a)* अधोनिर्दिष्टाः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 1×10=10

*(i)* 'क, त, प'-वर्णानाम् उच्चारणस्थानानि लेख्यानि।

*(ii)* का गुणसंज्ञा? गुणसंज्ञा-विधायकं सूत्रं लिख्यताम्।

*(iii)* प्रगृह्य-संज्ञा-विधायकं सूत्रं व्याख्यायताम्।

*(iv)* 'यण्'-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

*(v)* 'तन्मयः' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिविच्छेदो विधेयः।

*(vi)* 'उपयमुनम्'—विग्रहपूर्वकं समासनामापि लिखत।

*(vii)* 'नीलोत्पलम्'—सूत्रोल्लेखपूर्वकं विग्रहो विधेयः।

*(viii)* 'क्रमम् अनतिक्रम्य'—समासनामोल्लेखपूर्वकं समासो विधेयः।

*(ix)* 'तच्छ्रुत्वा'—सूत्रोल्लेखपूर्वकं सन्धिविच्छेदो विधेयः।

*(x)* 'एते जनाः ग्रामं गच्छन्ति'—वाच्यपरिवर्त्तनं क्रियताम्।

*(b)* अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सूत्रोल्लेखपूर्वकं विभक्ति-प्रयोगः संस्कृतभाषया निर्णेयः — 2×5=10

*(i)* कारयति भृत्यं भृत्येन वा कटम्।

*(ii)* क्रूरमभिक्रुध्यति।

*(iii)* अक्ष्णा काणः।

*(iv)* पापाज्जुगुप्सते।

*(v)* मातुः स्मरति।

*(c)* अधोलिखितानां सूत्राणामर्थोदाहरणानि संस्कृतेन *3-4* पंक्तिभिः लेख्यानि— 2×5=10

*(i)* आदिरन्त्येन सहेता।

*(ii)* अचोऽन्त्यादि टि।

*(iii)* दिक्संख्ये संज्ञायाम्।

*(iv)* यस्य च भावेन भावलक्षणम्।

*(v)* लशक्वतद्धिते।

(d) संस्कृत-काव्यशास्त्रे वक्रोक्ति-सिद्धान्तस्य स्थानं विमृश्यताम् (*150* शब्दपरिमितम्)। 10

(e) संस्कृत-व्याकरणशास्त्रे समासमाश्रित्य निबन्धो लेख्यः (*150* शब्दपरिमितम्)। 10

**2.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) वैदिक-संस्कृतभाषायाः स्वरूपं महत्त्वं च प्रतिपाद्यताम्। 20

Explain the structure and importance of Vedic Sanskrit.

(b) संस्कृतभाषायाः गौरवसंवर्धने पाणिनेः योगदानं विवेच्यताम्। 15

Elaborate the contribution of Pāṇini in glorifying Sanskrit language.

(c) भाषाविज्ञान-क्षेत्रे निरुक्तस्य अवदानं समीक्ष्यताम्। 15

Critically analyse the contribution of *Nirukta* in linguistic studies.

**3.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) ''महाकविः बाणभट्टः संस्कृत-गद्यकाव्यरचनायां सर्वोत्कृष्टः'' इति मतं सोदाहरणं प्रमाणीक्रियताम्। 15

Analyse the statement—''Mahākavi Bāṇabhaṭṭa is the best in Sanskrit Gadya Kāvya''.

(b) संस्कृत-काव्य-समीक्षायां 'रस-सिद्धान्त'स्य स्थानं निर्धार्यताम्। 15

Examine the state of 'Rasa-Siddhānta' in Sanskrit Kāvya analysis.

(c) ''रामकथामाश्रित्य संस्कृते बहूनि काव्यानि विरचितानि''—तथ्यमिदं विवेच्यताम्। 10

''Large amount of Sanskrit literature is produced on the basis of Rāmākathā.'' Comment on the statement.

(d) ''उत्तररामचरिते भवभूतिर्विशिष्यते''—कथनमिदं समीक्ष्यताम्। 10

''उत्तररामचरिते भवभूतिर्विशिष्यते''—Examine critically this statement.

**4.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) ''योगः कर्मसु कौशलम्''—भणितिरियं सोदाहरणं समीक्ष्यताम्। 20

''योगः कर्मसु कौशलम्''—Examine this statement with example.

(b) संस्कृतमहाकाव्यस्वरूपं सम्यक् प्रतिपाद्यताम्। 15

Explain the concept of Sanskrit Mahākāvya in detail.

(c) ''मेघे माघे गतं वयः''—सूक्तिरियं सोदाहरणं विवेच्यताम्। 15

''मेघे माघे गतं वयः''—Examine this statement with example.

## खण्ड—B / SECTION—B

5. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 10×5=50

Answer all of the following (to be written in Sanskrit language) :

(a) 'पुरुषार्थचतुष्टयमाश्रित्य' एकः निबन्धः संस्कृतेन लिख्यताम्।

Write an essay based on 'Puruṣārthacatuṣṭayam'.

(b) उपनयन-वेदारम्भ-संस्कारयोः महत्त्वं प्रतिपाद्यताम्।

Explain the importance of Upanayana and Vedārambha Saṁskāras.

(c) आश्रम-व्यवस्थायाः स्वरूपं महत्त्वं च निरूप्यताम्।

Describe the concept and importance of Āśrama System.

(d) दर्शनसाहित्ये सांख्यदर्शनस्य महत्त्वं निर्धार्यताम्।

Establish the importance of Sāṁkhya Darśana in philosophy literature.

(e) संस्कृतसाहित्येषु वर्णिता 'शिल्पविद्या' स्वभाषायां संस्कृतेन वर्ण्यताम्।

Describe in own Sanskrit language 'Śilpa Vidyā' as available in Sanskrit literature.

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) वेदान्तानुसारं 'ब्रह्म'स्वरूपं प्रतिपाद्यताम्। 20

Explain the concept of 'Brahma' according to Vedānta.

(b) न्यायशास्त्रे 'अनुमान-प्रमाण'स्य स्थानं स्वरूपं च विवेच्यताम्। 15

Critically analyse the position and concept of 'Anumāna-Pramāṇa' in Nyāya Śāstra.

(c) भारतीयदर्शनशास्त्रे वर्णितं 'मोक्ष'स्वरूपं प्रतिपाद्यताम्। 15

Explain the concept of 'Mokṣa' according to Indian Philosophy.

7. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) 'प्राचीन-संस्कृतसाहित्ये संगीतकला' इति विषयमाश्रित्य निबन्धो लेख्यः। 20

Write an essay on 'Music on the basis of ancient Sanskrit literature'.

(b) मानवजीवने **श्रीमद्भगवद्गीतायाः** महत्त्वं सोदाहरणं विवेच्यताम्। 15

Explain, with example, the importance of *Śrīmadbhagavadgītā* in human life.

(c) संस्कृतभाषायाः वैज्ञानिकता सप्रमाणं निरूप्यताम्। 15

Explain the scientific nature of Sanskrit language with illustration.

8. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

(a) अधोलिखित-सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं 3-4 पंक्तिभिः भवेत्— 5×5=25

आसीदशेषनरपतिशिरः समभ्यर्चितशासनः पाकशासन इवापरः, चतुरुदधिमालामेखलाया भुवो भर्त्ता, चक्रवर्तिलक्षणोपेतः, हर इव जितमन्मथः, गुह इवाप्रतिहतशक्तिः, वैनतेय इव विनतानन्दजननः राजा शूद्रको नाम।

नाभिव यो निर्भिन्नारातिहृदयो विरचितनरसिंहरूपाडम्बरम्, एकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितं जहासेव वासुदेवम्।

यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति स्म भगवतो नारायणस्य।

यस्य च हृदयस्थितानपि पत्नीन् दिधक्षुरिव प्रतापानलो वियोगिनीनामपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल।

(i) राजा शूद्रकः कीदृशः आसीत्?

(ii) सः कथं विष्णोः उपहासं करोति स्म?

(iii) तेन नारायणस्य अनुकरणं कथं कृतम्?

(iv) शूद्रके के-के गुणाः आसन्?

(v) राज्ञः प्रतापानलः रिपुसुन्दरीणां हृदयानि कथं ज्वालयति स्म?

*(b)* अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानाम् उत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

आसीद् धुल्लिकापुरे पार्वती नाम स्वदेवरनिकेतने दास्यकर्म कुर्वाणा काचिद् गतभर्तृका। बालाम् इमां सुवर्ण-सवर्णाङ्गी कमललोचनां केनचिद् बालवरेण परिणाय्य तत् पितरौ दिवं गतौ। अचिराद् विवाहोत्तरं स बालपतिरपि तावन्वगात्। ततः प्रभृति बालविधवेयं भर्तृ-बन्धु-जनालये दीनभावा कथमपि जीवनयात्राम् असाधयत्। अथ आभानूदयाद् अनिशं कूपात् जलम् आहरन्ती, वस्त्र-संचयं धावन्ती क्षणमपि विश्रान्तिसुखं नोपलेभे। तद्देवरस्य आत्मजः पञ्चवर्षीयो निर्व्याजमधुरालापः तस्या एकमेवावलम्बनं बभूव।

अथ गच्छत्सु वर्षेषु कश्चिद् युवा पार्वत्या हृदयम् अगाहत। कश्चित् प्रवासी पार्वतीं कूपसन्निधौ दिवापश्यन् रात्रौ च मनसा विचिन्तयन् पुरेऽस्मिन् न्यलम्बत। तस्या अपूर्वलावण्यं दर्शं दर्शं विमोहितोऽभूत् तरुणोऽधिकाधिकम्।

एकदा कूपात् जलम् उद्धृत्य गृहं निवर्तमानायाः पार्वत्याः पंकिलायां भूमौ पदम् अस्खलत् सहसा च भूमौ न्यपतत्।

*(i)* पार्वती कुत्र किं कुर्वती निवसति स्म?

*(ii)* तस्याः शरीरलावण्यं कीदृशम् आसीत्?

*(iii)* विधवायाः तस्याः आलम्बनं किम् आसीत्?

*(iv)* पार्वत्याः हृदये कः प्रविष्टः?

*(v)* सा मार्गे कथं पतिता?

★ ★ ★

CS (Main) Exam,2019



# संस्कृतम्

प्रथमं प्रश्नपत्रम्

( साहित्यम् )

समयः होरात्रयम् (घंटा-त्रयम्) | पूर्णाङ्काः 250

## प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वयेषु** विभाजिताः **अष्ट**-प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये। शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम्। तत्र प्रत्येकखण्डात् **एकम्** अवश्यं करणीयम्।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः।

प्रश्नसंख्या **1**, **5** तथा **8** **संस्कृतभाषयैव** समाधेयाः। शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा **प्रवेशपत्रे** स्वीकृत-भाषया करणीयम्। संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया। अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति।

# SANSKRIT

PAPER—I

( LITERATURE )

Time Allowed : Three Hours | Maximum Marks : 250

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड—A / SECTION—A

**1.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

*(a)* अधोनिर्दिष्टाः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 1×10=10

*(i)* 'स, ऋ, ल'-वर्णानाम् उच्चारणस्थानानि लेख्यानि।

*(ii)* 'बालिका वस्त्रं सीव्यति'—वाच्यपरिवर्तनं क्रियताम्।

*(iii)* 'झष्'-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

*(iv)* संयोगसंज्ञा-विधायकं सूत्रं व्याख्यायताम्।

*(v)* 'छात्राः लेखं लिखन्ति'—वाच्यपरिवर्तनं क्रियताम्।

*(vi)* 'हरिम् + वन्दे'—सूत्रोल्लेखपुरस्सरं सन्धिकार्यं विधेयम्।

*(vii)* 'दीर्घसक्थः' इत्यत्र विग्रहपूर्वकं समास-नाम लिखत।

*(viii)* 'जश्'-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

*(ix)* 'पञ्चानां गङ्गानां समाहारः'—समासनामोल्लेखपूर्वकं समासो विधीयताम्।

*(x)* 'सप्तर्षयः' इत्यत्र विग्रहपूर्वकं समास-नाम लिखत।

*(b)* अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सूत्रोल्लेखपूर्वकं विभक्ति-प्रयोगः संस्कृतभाषया निर्णेयः — 2×5=10

*(i)* रामेण <u>बाणेन</u> हतो बाली।

*(ii)* <u>हिमवतो</u> गङ्गा प्रभवति।

*(iii)* <u>देवदत्तं</u> शतं मुष्णाति।

*(iv)* धावतोऽ<u>श्वात्</u> पतति।

*(v)* <u>स्थाल्याम्</u>ओदनं पचति।

*(c)* अधोलिखितानां सूत्राणामर्थोदाहरणानि संस्कृतेन *3-4* पंक्तिभिः लेख्यानि— 2×5=10

*(i)* जनिकर्तुः प्रकृतिः।

*(ii)* इत्थंभूतलक्षणे।

*(iii)* विप्रतिषेधे परं कार्यम्।

*(iv)* अनुस्वारस्य ययि परसवर्णः।

*(v)* यरोऽनुनासिकेऽनुनासिको वा।

(d) कति कारकाः? तेषां नामानि विलिख्य 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति नियमस्य संस्कृतेन सोदाहरणं व्याख्या कार्या। 10

(e) खण्डकाव्यस्य लक्षणं विलिख्य कस्याप्येकस्य प्रसिद्धस्य खण्डकाव्यस्य समीक्षा विधीयताम्। 10

**2.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) वैदिकसंस्कृत-लौकिकसंस्कृतयोः साम्यं वैषम्यञ्च विविच्यताम्। 20

Explain the similarities and dissimilarities between Vedic Sanskrit and Classical Sanskrit languages.

(b) ''तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि''—अस्य सोदाहरणं व्याख्या कार्या। 15

Explain with illustration of ''तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि''।

(c) प्रसिद्धाः ध्वनिनियमाः सोदाहरणं व्याख्येयाः। 15

Explain the important phonetic rules with suitable examples.

**3.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) वाल्मीकि-रामायणे रामराज्यस्य अवधारणा केन प्रकारेण प्रतिपादिता? स्पष्टीक्रियताम्। 15

Explain the concept of Rāmarājya as derived in Vālmīki Rāmāyaṇa.

(b) ''दण्डिनः पदलालित्यम्''—उक्तिरियं समीक्ष्यताम्। 10

''दण्डिनः पदलालित्यम्''—Examine critically this statement.

(c) ''यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्''—कथनमिदं समालोच्यताम्। 15

''यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्''— Explain this statement.

(d) संस्कृतचम्पूकाव्यस्य उत्पत्तिर्विकासयोः चर्चा विधेया। 10

Discuss the origin and development of Sanskrit Campū literature.

**4.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) प्रकरणस्य लक्षणं विलिख्य कस्याप्येकस्य संस्कृत-प्रकरणस्य (रूपकस्य भेदः) समीक्षा विधीयताम्। 20

Define Rūpaka and describe any one of Sanskrit Prakaraṇa (kind of Rūpaka).

(b) संस्कृतसाहित्ये कथाऽऽख्यायिकययोः को भेदः? कस्यापि एकस्याः आख्यायिकायाः वैशिष्ट्यं विवेचनीयम्। 15

What is the difference between Kathā and Ākhyāyikā in Sanskrit literature? Discuss the characteristics of any one of Ākhyāyikā.

(c) अलङ्कारसम्प्रदायम् अभिलक्ष्य निबन्धो लेख्यः। 15

Write an essay on Alaṅkāra-sampradāya.

## खण्ड—B / SECTION—B

**5.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 10×5=50

Answer all of the following (to be written in Sanskrit language) :

(a) भारतीय-कलानां वैविध्यम् इति विषयमधिकृत्य निबन्धो लेख्यः।

(b) बौद्धदर्शने प्रतिपादितं, प्रतीत्यसमुत्पादं विशदयत।

(c) न्यायदर्शनानुसारं प्रत्यक्ष-प्रमाणं निरूप्यताम्।

(d) भारतीय-विज्ञानक्षेत्रे आचार्य-आर्यभट्टस्य योगदानं समीक्ष्यताम्।

(e) ''चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः''—अस्य कथनस्यालोके प्राचीनवर्णव्यवस्थामधिकृत्य निबन्धो लेख्यः।

**6.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) ''पुरुषार्थचतुष्टयस्य परिपालनं जीवनयापनस्य समीचीना रीतिः''—अस्मिन् विषये स्वविचारान् प्रकटयत। 20

''पुरुषार्थचतुष्टयस्य परिपालनं जीवनयापनस्य समीचीना रीतिः''—Explain your views regarding this statement.

(b) सांख्यमतानुसारं सत्कार्यवादं सोदाहरणं विवेचयत। 15

Explain Satkāryavāda with example according to Sāṁkhya Philosophy.

(c) प्राचीन-भारते चिकित्सा-विज्ञानं कीदृशमासीत्? विवेच्यताम्। 15

What was the condition of Medical Science in ancient India? Explain this.

7. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) जैनदर्शन-प्रतिपादितम् 'अनेकान्तवादं' विशदयत। 15

Clarify the theory of 'अनेकान्तवाद' as propagated in Jain Philosophy.

(b) वैशेषिकदर्शनाभिमतस्य 'सामान्य'-पदार्थस्य स्वरूपं प्रदर्श्य दर्शनक्षेत्रे तस्योपयोगित्वं निर्णेयम्। 15

Shed light on the 'Sāmānya' Substance in accordance with the Vaiśeṣika Philosophy and judge its utility in the field of Philosophy.

(c) वेदान्तानुसारम् 'अधिकारि'स्वरूपं वर्णनीयम्। 20

Explain 'Adhikārī' according to Vedānta Philosophy.

8. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

(a) अधोलिखित-सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

अन्तिम-समये बुद्धः कुशीनारा-स्थानमागत्य हिरण्यवती-नद्यास्तटे शालवने अतिष्ठत्। बुद्धस्तत्र शयितवान् उक्तवान् च "आनन्द ! यः धर्मः मया उपदिष्टः स्पष्टीकृतश्च स एव शास्ता मन्तव्यः" इति। एवमुक्त्वा बुद्धो ध्यानमग्नो बभूव। तस्य शरीरपातः प्राणत्यागः वा तदानीमेव जातः। बुद्धे परिनिवृत्ते सति बहवः भिक्षवः क्रन्दितुं प्रवृत्ताः। परं सुभद्रनामा भिक्षुः बुद्धस्य शरीरपातेन प्रसन्नः अभूत्। सर्वान् भिक्षून् आहूय स उक्तवान्—सम्प्रति शोकं न कुरुत। एतत्र कुरुत, तत्र न कुरुत, एतत् कुरुत, तत् कुरुत इति वक्ता प्रस्थितः। बुद्धाज्ञयाः वयं मुक्ताः। अधुना यथेच्छं कर्तुं शक्नुमः। सुभद्रस्य वचनं श्रुत्वा बुद्धस्य वरिष्ठः शिष्यः महाकाश्यपः चिन्तितवान् यद् एतस्या अव्यवस्थायाः पूर्वमेव बुद्धवचनानां प्रामाणिकं सङ्कलनं यथा शीघ्रं करणीयमिति। स्वचिन्तितं कार्यरूपेण परिणतं कर्तुं स निश्चितवान्। राजगृहनगरे राज्ञः अजातशत्रोः साहाय्येन एका सभा आहूता। तत्र पञ्चशतसङ्ख्यकाः अर्हन्तः निमन्त्रिताः। साभापत्यं च स्वयं महाकाश्यपेन कृतम्। अस्यां सभायां सङ्घस्य सर्वे बुद्धकृताः नियमाः बुद्धोपदेशाः च सङ्कलिताः कण्ठीकृताश्च।

(i) बुद्धस्य शरीरपातः प्राणत्यागः वा कुत्र कदा च जातः?

(ii) बुद्धे शरीरपाते सति सुभद्र-भिक्षोः प्रसन्नतायाः किं कारणमासीत्?

(iii) केन राज्ञः साहाय्येन सभा आहूता? किं प्रयोजनमासीत् सभायाः?

(iv) सभायां कति अर्हन्तः निमन्त्रिताः? तस्याः सभायाः च साभापत्यं केन कृतम्?

(v) सभायाः कार्यरूपेण परिणतिः केन प्रकारेण सञ्जाता?

(b) अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

वेदाध्ययने ज्ञायते यत् मानवजीवनं चतुर्षु विभागेषु विभक्तम्। ते चत्वारो विभागाः चत्वारः आश्रमा अप्युच्यन्ते। आश्रम्यते स्थीयते यस्मिन् स आश्रमः। ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्चत्वारः एते आश्रमाः। तेषु प्रथमः सर्वैरपरिहार्यत्वेन परिपालनीयः। गृहस्थादित्रयः आश्रमास्तु ऐच्छिकाः। विद्याध्ययनं, तपोमयजीवनयापनं, सर्वविधगुणानां संग्रहश्चाश्रमेऽस्मिन् प्रधानानि कर्तव्यानि। ब्रह्मचर्यकाले ब्रह्मचारिणः गुरुकुलाश्रमे निवसन्तः आचार्यसकाशात् विविधाः विद्याः, शिल्पकलाः, विज्ञानानि च निःशुल्कं शिक्षन्ते स्म। द्वितीयः आश्रमः गृहस्थाश्रमोऽस्ति। भौतिकी शारीरिकी मानसिकी च समुन्नतिः, भौतिक-विषयाणामुपभोगः, दाम्पत्यजीवनयापनं, वंशप्रतिष्ठायै सन्तानोत्पत्तिश्चाश्रमेऽस्मिन् विशिष्टानि कर्माणि। गृहस्थाश्रमः सर्वेषु आश्रमेषु श्रेष्ठोऽस्ति। यथा वायुं समाश्रित्य सर्वे जन्तवः जीवन्ति तथैव सर्वे आश्रमाः गृहस्थाश्रमाश्रिताः सन्ति, यतः गृहस्थेन त्रयोऽपि आश्रमिणो नित्यं ज्ञानेनान्नेन च प्रतिपालिताः भवन्ति। अस्य गृहस्थाश्रमस्य चोपक्रमः विवाहसंस्कारेण सञ्जायते। वस्तुतः सन्तानोत्पत्त्यै विवाहः आवश्यकम्। न क्षणिकसम्भोगलक्षणं हि तद्विवाहो नाम। एष खलु दम्पत्योः चिरजीवनमिलनरूपः। नारी न मनाक् सम्भोगवस्तुरूपा अपितु सम्मान्या, श्रद्धास्पदा, गृहसाम्राज्ञीस्वरूपा च। न केवलं दम्पत्योरेव शान्तिर्विवाहे निर्भरा किन्तु समाजस्य शान्तिरपि सुतरामनुसन्दधाति। इत्थं विवाहस्य वैशिष्ट्यमस्ति, नास्ति अस्मिन् कोऽपि सन्देहः।

*(i)* का परिभाषा आश्रमस्य? ब्रह्मचारिणः गुरुकुलाश्रमे के के विषयाः शिक्षन्ते स्म?

*(ii)* ब्रह्मचर्याश्रमे कानि प्रधानानि कर्तव्यानि?

*(iii)* गृहस्थाश्रमे कानि विशिष्टानि कर्माणि?

*(iv)* गृहस्थाश्रमः कथं श्रेष्ठोऽस्ति?

*(v)* किं विवाहो नाम? तस्य किं वैशिष्ट्यञ्च?

★ ★ ★

# संस्कृतम्

प्रथमं प्रश्नपत्रम्

( साहित्यम् )

| समयः होरात्रयम् (घंटा-त्रयम्) | पूर्णाङ्काः 250 |
| --- | --- |

**प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वयेषु** विभाजिताः **अष्ट**-प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये। शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम्। तत्र प्रत्येकखण्डात् **एकम्** अवश्यं करणीयम्।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः।

प्रश्नसंख्या **1**, **5** तथा **8** **संस्कृतभाषयैव** समाधेयाः। शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा **प्रवेशपत्रे** स्वीकृत-भाषया करणीयम्। संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया। अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति।

# SANSKRIT

PAPER—I

( LITERATURE )

| Time Allowed : Three Hours | Maximum Marks : 250 |
| --- | --- |

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड—A / SECTION—A

1. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

(a) अधोनिर्दिष्टाः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 1×10=10

(i) 'य, म, त'-वर्णानाम् उच्चारणस्थानानि लेख्यानि।

(ii) 'एतद् + मुरारिः'—सूत्रोल्लेखपूर्वकं सन्धिकार्यं विधेयम्।

(iii) का 'वृद्धिसंज्ञा'? वृद्धिसंज्ञा-विधायकं सूत्रं व्याख्यायताम्।

(iv) 'यण्'-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

(v) 'मध्वरिः' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः कार्यः।

(vi) 'सचक्रम्'—विग्रहपूर्वकं समास-नाम लिखत।

(vii) 'द्वयोः यमुनयोः समाहारः'—समासनामोल्लेखपूर्वकं समासो विधेयः।

(viii) 'बालिकाः पुस्तकानि पठन्ति'—वाच्यपरिवर्तनं क्रियताम्।

(ix) 'जलजाक्षी'—विग्रहपूर्वकं समास-नाम लिखत।

(x) 'गुणसंज्ञा' का? गुणसंज्ञा-विधायकं सूत्रं लिख्यताम्।

(b) अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सूत्रोल्लेखपूर्वकं विभक्ति-प्रयोगः संस्कृतभाषया निर्णेयः — 2×5=10

(i) <u>ग्रामं</u> गच्छन् <u>तृणं</u> स्पृशति।

(ii) <u>पादेन</u> खञ्जः।

(iii) <u>कृष्णाय</u> क्रुद्ध्यति।

(iv) <u>चोराद्</u> बिभेति।

(v) <u>गोषु</u> <u>दुह्यमानासु</u> गतः।

(c) अधोलिखितानां सूत्राणामर्थोदाहरणानि संस्कृतेन 3-4 पंक्तिभिः लेख्यानि— 2×5=10

(i) तुल्यास्यप्रयत्नं सवर्णम्।

(ii) एचोऽयवायावः।

(iii) नदीभिश्च।

(iv) तथायुक्तं चानीप्सितम्।

(v) येनाङ्गविकारः।

(d) संस्कृतव्याकरणशास्त्रे सन्धिमाश्रित्य निबन्धो लेख्यः। 10

(e) ''दुःखसंवेदनायैव रामे चैतन्यमाहितम्''—उत्तररामचरितस्य कथनमिदं समालोच्यताम्। 10

2. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) वैदिकसंस्कृतस्य वैशिष्ट्यं स्वरूपञ्च विविच्यताम्। 20

Explain the characteristics and structure of Vedic Sanskrit.

(b) संस्कृत-काव्यशास्त्रे ध्वनिसिद्धान्तस्य वैशिष्ट्यं समीक्ष्यताम्। 15

Critically analyze the characteristics of 'Dhvani-siddhānta' in Sanskrit poetics.

(c) भाषाविज्ञान-क्षेत्रे पतञ्जलेः योगदानं प्रकाश्यताम्। 15

Throw light on the contribution of Patañjali in linguistic studies.

3. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) संस्कृतगद्यकाव्यपरम्परायाः उत्पत्तिर्विकासयोः समीक्षा कार्या। 15

Examine critically the origin and development of tradition of Sanskrit prose literature.

(b) ''यत्र भारते तत्र भारते''—उक्तिरियं समीक्ष्यताम्। 15

''यत्र भारते तत्र भारते''—Examine critically this statement.

(c) ''बाणोच्छिष्टं जगत्सर्वम्''—कथनमिदं समालोच्यताम्। 10

''बाणोच्छिष्टं जगत्सर्वम्''— Explain this statement.

(d) व्यञ्जनायाः स्वरूपं सोदाहरणं प्रतिपाद्यताम्। 10

Explain with examples the characteristics of 'Vyañjanā'.

4. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) ''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला''—भणितिरियं समीक्ष्यताम्। 20

''काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला''— Examine critically this statement.

(b) संस्कृत-काव्यशास्त्रे विवेचितानि काव्यप्रयोजनानि विशदयत। 15

Elucidate 'Kāvya-prayojanāni' as explained in Sanskrit poetics.

(c) ''एको रसः करुण एव निमित्तभेदात्''—उत्तररामचरितमभिलक्ष्य उक्तिरियं सम्यक् समीक्ष्यताम्। 15

''एको रसः करुण एव निमित्तभेदात्''—Explain properly this statement in the light of 'Uttararāmacaritam'.

## खण्ड—B / SECTION—B

**5.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 10×5=50

Answer all of the following (to be written in Sanskrit language) :

(a) अर्थपुरुषार्थमाश्रित्य निबन्धो लेख्यः।

(b) उपनयनसंस्कारस्य स्वरूपं महत्त्वं च प्रतिपाद्यताम्।

(c) वर्णव्यवस्थायाः वैशिष्ट्यं निरूप्यताम्।

(d) बौद्धदर्शनानुसारं अनात्मवादं विविच्यताम्।

(e) प्राचीन-भारते वास्तुविज्ञानमधिकृत्य निबन्धो विरचनीयः।

**6.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) सांख्यदर्शनानुसारं कैवल्यसिद्धान्तस्य चर्चां कुरुत। 20

Discuss the theory of 'Kaivalya' according to Sāṁkhya Philosophy.

(b) शाङ्करवेदान्तानुसारं मोक्षस्वरूपं प्रतिपाद्यताम्। 15

Explain the concept of 'Mokṣa' according to Śaṅkara-vedānta.

(c) बौद्धदर्शनस्य सौतान्त्रिकसम्प्रदायं विविच्यताम्। 15

Describe the Sautāntrika School of Buddhist Philosophy.

**7.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) श्रीमद्भगवद्गीतायां प्रतिपादितं स्थितप्रज्ञलक्षणं निरूप्यताम्। 20

Explain the characteristics of 'Sthitaprajña' according to 'Śrīmadbhagavadgītā'.

(b) जैनदर्शनानुसारं 'स्याद्वाद' इति विषयमाश्रित्य निबन्धो लेख्यः। 15

**Write an essay on 'Syādvāda' as propagated in Jaina Philosophy.**

(c) वैशेषिकदर्शनाभिमतस्य प्रामाण्यवादस्य समीक्षा कार्या। 15

**Examine critically 'Prāmāṇyavāda' in accordance with the Vaiśeṣika Philosophy.**

**8.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

**Answer all of the following (to be written in Sanskrit language) :**

(a) अधोलिखित-सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

वास्तविकं भारतवर्षं नगरापेक्षया ग्रामेष्वेव निवसति। स्वातन्त्र्यस्यावश्यकतापि तेभ्य एवास्तीति विज्ञाय ग्रामीणानामावश्यकतां मनोभावप्रवृत्तिश्च ज्ञातुं महात्मा-गान्धीरपि निवास-वेषभोजनादिभिर्ग्रामीण एव संवृत्तः। यन्त्रालयानां प्रचारेण समुत्पन्नानां कार्याभाव-कृत्रिमता-दुराचार-आर्थिकशोषण-वर्ग संघर्षादीनामपसारणाय ग्रामोद्योगानां प्रसारमीहमानेनानेन ग्रामोद्योगसङ्घोऽपि संस्थापितः। इत्थं तर्कुयन्त्र-गृहोद्योग-ग्रामोद्योगादि-वैयक्तिकोद्योगानां विकासेन आर्थिकसमस्यायाः सुधारोऽपि कर्तुं शक्यते। आङ्गलानां वैभववृद्धिमूलं मुख्यतया वस्त्रवाणिज्यमेवास्ति, एतदर्थमेव तैर्विश्वस्य महान् भूभागः स्वायत्तीकृतः। अतस्तेषां वाणिज्यविनाशाय महात्मा विदेशीय-वस्तु-बहिष्कारं खादीप्रचारञ्च कुर्वन्नास्ते। अयं धर्माद् राजनीतिं पृथक् न मन्यते। गान्धिवादस्य अहिंसा सत्यञ्चेति द्वावेव आधारभूतौ सिद्धान्तौ विद्येते। शान्तिमयसाधनैः सहयोगेन सामञ्जस्येन च सर्वासां समस्यानां पूर्तिञ्चिकीर्षति। विश्वेषां स्वाधीनतासमर्थकोऽयं वादः सत्ताधारिणां विनाशापेक्षया तान् संरक्षकत्वेन स्वीकरोति।

(i) महात्मा-गान्धिना ग्रामोद्योगसङ्घः किमर्थं संस्थापितः?

(ii) विदेशीय-वस्तु-बहिष्कारस्य प्रयोजनं किमासीत्?

(iii) गान्धी किं कारणमाश्रित्य ग्रामीण एव संवृत्तः?

(iv) गान्धिवादस्य कानि वैशिष्ट्यानि?

(v) सर्वासां समस्यानां पूर्तिः कथं भवितुमर्हति?

(b) अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानाम् उत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकम् उत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

विश्वधर्मसम्मेलने प्रथमदिने स्वामी विवेकानन्दः पञ्चदशनिमेषान् यावदेव भाषणम् अकरोत्, तावता एव सः जगद्विख्यातः जातः। भाषणकरणात् पूर्वं सः आसीत् कश्चित् अनामधेयः। परं तस्य भाषणस्य अनन्तरं तु सर्वासु अपि वृत्तपत्रिकासु तस्य एव भावचित्रं विराजते स्म। सर्वेषां मुखेऽपि तस्य एव नाम। भाषणानन्तरं स्वामिनः करांशुकस्य

अश्वलस्य स्पर्शार्थं सहस्रशः महिलाः अहमहमिकया अग्रे आगताः। तत् दृष्ट्वा काचित् ज्येष्ठा महिला अवदत्— ''वत्स, भवता अत्र यदि जयः प्राप्येत तर्हि निश्चयेन भवान् देवपुत्रः एव'' इति। कोट्यधीशाः स्वगृहं प्रति स्वामिनः निमन्त्रणाय स्पर्धमानाः आसन्। प्रासादसदृशानि गृहाणि हंसतूलिकातल्पादयः च तं प्रतीक्षन्ते स्म किन्तु सः ततः लेशमात्रेणापि विचलितः न जातः। जनानां निन्दापात्रतां गतेन तेन यथा नैराश्यं नानुभूतं तथा अभूतपूर्वं सत्कारं प्राप्तवता अपि तेन आत्मविस्मृतिः न प्राप्ता। स्तुतिनिन्दयोः समत्वं तेन रक्षितम्। गर्विष्ठान् पाश्चात्त्यदेशान् प्रति स्वस्य योग्यतमं पुत्रमेव दूतरूपेण प्रेषयन्ती भारतमाता तेन गौरवान्विता जाता।

*(i)* स्वामी विवेकानन्दः कथं जगद्विख्यातः जातः?

*(ii)* कस्याश्चित् ज्येष्ठायाः प्रतिक्रिया स्वामिनं विषये काऽऽसीत्?

*(iii)* भाषणानन्तरं कीदृशं परिवर्तनं तत्र दृश्यते स्म?

*(iv)* स्तुतिनिन्दयोः समत्वं विवेकानन्देन कथं रक्षितम्?

*(v)* भारतमाता किमर्थं गौरवान्विता जाता?

★ ★ ★

# संस्कृतम्

## प्रथमं प्रश्नपत्रम्

## ( साहित्यम् )

समयः होरात्रयम् (घंटा-त्रयम्) | पूर्णाङ्काः 250

**प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वये** विभाजिताः **अष्ट**-प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये। शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम्। तत्र प्रत्येकखण्डात् **एकम्** अवश्यं करणीयम्।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः।

प्रश्नसंख्या **1, 5** तथा **8 संस्कृतभाषयैव** समाधेयाः। शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा **प्रवेशपत्रे** स्वीकृत-भाषया करणीयम्। संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया। अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति।

# SANSKRIT

## PAPER—I

## ( LITERATURE )

Time Allowed : Three Hours | Maximum Marks : 250

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

CS (Main) Exam 2021

## खण्ड—A / SECTION—A

**1.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

*(a)* अधोनिर्दिष्टाः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 1×10=10

*(i)* 'जश्' प्रत्याहारान्तर्गतान् वर्णान् दर्शयत।

*(ii)* का अनुनासिकसंज्ञा? सूत्रनिर्देशपूर्वकं व्याख्यायताम्।

*(iii)* संयोगसंज्ञासूत्रं किम्? तस्य कः अर्थः? व्याख्यायताम्।

*(iv)* सुधी + उपास्यः —केन सूत्रेण ईकारस्थाने यकारादेशः भवति?

*(v)* तल्लयः —सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः विधेयः।

*(vi)* यवेभ्यो गां वारयति—रेखाङ्कितपदस्य सकारणं विभक्तिं निरूपयत।

*(vii)* रूपस्य योग्यम्—समासं समासनाम च दर्शयत।

*(viii)* मातृसदृशः —विग्रहं समासनाम च दर्शयत।

*(ix)* बालिका गृहं गच्छति—वाच्यपरिवर्तनं क्रियताम्।

*(x)* तेन किं कृतम्?—वाच्यपरिवर्तनं क्रियताम्।

*(b)* अधोनिर्दिष्टेषु वाक्येषु रेखाङ्कितपदानां ससूत्रं विभक्तिनिरूपणं संस्कृतभाषया करणीयम् — 2×5=10

*(i)* द्रोणो व्रीहिः।

*(ii)* सिंहो वनम् अध्यास्ते।

*(iii)* मासेन व्याकरणम् अधीतम्।

*(iv)* पुष्पेभ्यः स्पृहयति।

*(v)* ग्रामस्य दक्षिणेन।

*(c)* अधोलिखितानां सूत्राणाम् अर्थोदाहरणानि संस्कृतभाषया *3-4* पंक्तिभिः प्रदेयानि— 2×5=10

*(i)* हलन्त्यम्

*(ii)* आद् गुणः

*(iii)* अकः सवर्णे दीर्घः

*(iv)* दिवः कर्म च

*(v)* न निर्धारणे

*(d)* संस्कृतव्याकरणशास्त्रानुसारं वर्णानां स्थानप्रयत्नविवेचनं करणीयम्। 10

*(e)* कर्मधारयसमासमाश्रित्य एको निबन्धो लेख्यः। 10

**2.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* वैदिकभाषायां सुबन्तप्रयोगवैशिष्ट्यं दर्शयत। 20

Discuss the special characteristics of the use of Sup-ending words in Vedic language.

*(b)* लौकिकसंस्कृतभाषायां कारकमाश्रित्य निबन्धं लिखत। 15

Write an essay on the notion of Kāraka in classical Sanskrit language.

*(c)* भाषापरिवारसंरचने संस्कृतस्य योगदानं समीक्ष्यताम्। 15

Critically examine the contribution of Sanskrit to the formation of family of languages.

**3.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* संस्कृतसाहित्यसमीक्षणे अलंकारसिद्धान्तस्य इतिहासं वर्णयत। 15

Discuss the history of the theory of Alaṁkāra in the Sanskrit literary criticism.

*(b)* महाभारते भीष्मस्य भूमिका समीक्षणीया। 15

Analyse the role of Bhīṣma in the *Mahābhārata*.

*(c)* संस्कृत-नाट्यसाहित्ये भासस्य स्थानं विमृशत। 10

Analyse the position of Bhāsa in the dramatic literature of Sanskrit.

*(d)* संस्कृत-खण्डकाव्यस्य विकासं वर्णयत।. 10

Discuss the development of the Sanskrit Khaṇḍakāvyas.

**4.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* ''गीता सुगीता कर्तव्या''—उक्तिमिमां सोदाहरणं विशदयत। 20

''गीता सुगीता कर्तव्या''—Justify this statement with illustrations.

(b) ''कविकुलगुरुः कालिदासो विलासः''—सोदाहरणं भणितिमिमां विशदयत। 15

''कविकुलगुरुः कालिदासो विलासः''—Substantiate this statement with illustrations.

(c) संस्कृतसाहित्ये 'मुद्राराक्षस'नाटकस्य स्थानं विमृशत। 15

Discuss the place of the drama, *Mudrārākṣasa* in Sanskrit literature.

## खण्ड—B / SECTION—B

**5.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 10×5=50

Answer all of the following (to be written in Sanskrit language) :

(a) पुरुषार्थेषु धर्मस्य वैशिष्ट्यं समीक्ष्यताम्।

Examine the significance of Dharma from among the Puruṣārthas.

(b) विवाहसंस्कारस्य महत्त्वं वर्णयत।

Discuss the importance of the Vivāha-saṁskāra.

(c) ब्रह्मचर्याश्रमम् अध्ययनविधिं च वर्णयत।

Describe the Brahmacaryāśrama and the system of education.

(d) प्राचीनभारतस्य चित्रकलामधिकृत्य एकं निबन्धं लिखत।

Write an essay on the art of painting in ancient India.

(e) प्राचीनभारतस्य मूर्त्तिकलायाः वर्णनं कुरुत।

Discuss the art of iconography of ancient India.

**6.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) अद्वैतवेदान्तदर्शनम् अनुसृत्य मायां वर्णयत। 20

Discuss the notion of Māyā according to the philosophy of the Advaita Vedānta.

(b) सांख्यदर्शनानुसारं पुरुषस्य स्वरूपं निरूपयत। 15

Describe the nature of Puruṣa according to the Sāṁkhya Philosophy.

(c) बौद्धदर्शनस्य अष्टाङ्गमार्गान् वर्णयत। 15

Describe the Eightfold Path of the Buddhist Philosophy.

**7.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* प्राचीनभारतस्य नगरयोजनाम् आश्रित्य एकं निबन्धं रचयत। 20

Write an essay on the Town-planning in ancient India.

*(b)* भारतीयदर्शनस्य आस्तिकसम्प्रदायेषु मोक्षस्य स्वरूपं तत्प्राप्त्युपायान् च वर्णयत। 15

Describe the nature of liberation and means to attain it as discussed in the orthodox schools of Indian Philosophy.

*(c)* योगशास्त्रस्य उपकारितां वर्णयत। 15

Describe the utility of the Yogaśāstra.

**8.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

*(a)* अधोलिखितं सन्दर्भं पठित्वा तदधस्तात् पृष्टानां प्रश्नानाम् उत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** प्रदत्त। प्रत्येकम् उत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

अस्ति कस्मिंश्चिदधिष्ठाने चित्ररथो नाम राजा। तस्य योधैः सुरक्ष्यमाणं पद्मसरो नाम सरस्तिष्ठति। तत्र च प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति। षण्मासे षण्मासे पिच्छमेकैकं परित्यजन्ति। अथ तत्र सरसि सौवर्णो बृहत्पक्षी समायातः। तैश्चोक्तः —अस्माकं मध्ये त्वया न वस्तव्यं येन कारणेनास्माभिः षण्मासान्ते पिच्छैकैकदानं कृत्वा गृहीतमेतत्सरः। एवं च किं बहुना परस्परं द्वैधमुत्पन्नम्। स च राज्ञः शरणं गतोऽब्रवीत्—देव! एते पक्षिण एवं वदन्ति यदस्माकं राजा किं करिष्यति। न कस्याप्यावासं दद्मः। मया चोक्तम्—न शोभनं युष्माभिरभिहितम्। अहं गत्वा राज्ञे निवेदयिष्यामि। एवं स्थिते देवः प्रमाणम्। ततो राजा भृत्यानब्रवीत्—भो भोः! गच्छत। सर्वान् पक्षिणो गतासून् कृत्वा शीघ्रमानयत। राजादेशानन्तरमेव प्रचेलुस्ते। लगुडहस्तान् राजपुरुषान् दृष्ट्वा तत्रैकेन पक्षिणा वृद्धेनोक्तम्—भोः स्वजनाः! न शोभनमापतितम्। ततः सर्वैरेकमतीभूय शीघ्रमुत्पतितव्यम्। तैश्च तथानुष्ठितम्।

*(i)* पद्मसरः कस्य कथं च सुरक्षितम्?

*(ii)* तत्र के किं कुर्वन्तः तिष्ठन्ति?

*(iii)* आगतेन बृहत्पक्षिणा तेषां कीदृशं सम्भाषणं जातम्?

*(iv)* बृहत्पक्षी राज्ञे किं निवेदितवान्?

*(v)* राजादेशानन्तरं किं किमभूत्?

*(b)* अधोलिखितं सन्दर्भं पठित्वा तदधस्तात् पृष्टानां प्रश्नानाम् उत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** प्रदत्त। प्रत्येकम् उत्तरं *3-4* पंक्तिभिः भवेतु— 5×5=25

मित्रगुप्तोऽप्याचचक्षे—सोऽहमपि सुहृत्साधारणभ्रमणकारणः सुह्मेषु दामलिप्ताह्वनगरस्य बाह्योद्याने महान्तमुत्सवसमाजमालोकयम्। तत्र क्वचिदतिमुक्तकलतामण्डपे कमपि वीणावादनेनात्मानं विनोदयन्तमुत्कण्ठितं युवानमद्राक्षम्, अप्राक्षं च—''भद्र को नामायमुत्सवः? किमर्थं वा समारब्धः? केन वा निमित्तेन उत्सवमनादृत्य एकान्ते भवानुत्कण्ठित इव वीणाद्वितीयस्तिष्ठति?'' इति। सोऽभ्यधत्त—''सौम्य सुह्मपतिस्तुङ्गधन्वा नामानपत्यः प्रार्थितवान् अमुष्मिन् आयतने वसन्त्या विन्ध्यवासिन्याः पादमूलादपत्यद्वयम्।'' अनया च अस्मै प्रतिशयिताय स्वप्ने समादिष्टम्—''समुत्पत्स्यते तव एकः पुत्रः, जनिस्यते चैका दुहिता। स पुत्रो भगिन्याः आदरं करिष्यति। सा तु सप्तमाद् वर्षादारभ्य आपरिणयनात् प्रतिमासं कृत्तिकासु कन्दुकनृत्येन गुणवद्भर्तुः लाभाय मां समाराधयतु। यं चाभिलषेत् सा अमुष्मै देया। स चोत्सवः कन्दुकोत्सवनामास्तु'' इति।

*(i)* मित्रगुप्तः किं कुर्वन् उत्सवं दृष्टवान्?

*(ii)* उद्याने स कीदृशं युवानम् अपश्यत्?

*(iii)* तं युवानं मित्रगुप्तः किं पृष्टवान्?

*(iv)* स युवकः किम् अभिहितवान्?

*(v)* सुह्मपतिः स्वप्ने कं समादेशं प्राप्तवान्?

★★★

CIVIL SERVICES (MAIN) EXAM-2022



# संस्कृतम्

प्रथमं प्रश्नपत्रम्

( साहित्यम् )

CIVIL SERVICES (MAIN) EXAM-2022

समयः होरात्रयम् (घंटा-त्रयम्)

पूर्णाङ्काः 250

**प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वयेषु** विभाजिताः **अष्ट**-प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये। शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम्। तत्र प्रत्येकखण्डात् **एकम्** अवश्यं करणीयम्।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः।

प्रश्नसंख्या **1**, **5** तथा **8** **संस्कृतभाषयैव** समाधेयाः। शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा **प्रवेशपत्रे** स्वीकृत-भाषया करणीयम्। संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया। अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति।

# SANSKRIT

PAPER—I

( LITERATURE )

Time Allowed : Three Hours

Maximum Marks : 250

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड—A / SECTION—A

**1.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

*(a)* अधोनिर्दिष्टाः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 1×10=10

*(i)* 'च, त, प' वर्णानाम् उच्चारणस्थानानि लेख्यानि।

*(ii)* 'बालः घटं पश्यति'—वाच्यपरिवर्तनं क्रियताम्।

*(iii)* 'इण्' प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

*(iv)* सवर्णसंज्ञा-विधायकं सूत्रं व्याख्यायताम्।

*(v)* 'तेन वनशोभा दृश्यते'—वाच्यपरिवर्तनं क्रियताम्।

*(vi)* 'उपशरदम्' इत्यत्र विग्रहपूर्वकं समासनाम लिखत।

*(vii)* 'हरे + अव' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिकार्यं विधेयम्।

*(viii)* 'चित्रगुः' इत्यत्र विग्रहपूर्वकं समासनाम लिखत।

*(ix)* 'अम्' प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

*(x)* 'नीलम् उत्पलम्' इत्यत्र समासनामोल्लेखपूर्वकं समासो विधेयः।

*(b)* अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सूत्रोल्लेखपूर्वकं विभक्तिप्रयोगः संस्कृतभाषया निर्णेयः — 2×5=10

*(i)* <u>फलं</u> भुञ्जानो <u>कीटं</u> भुङ्क्ते।

*(ii)* <u>जटाभि</u>स्तापसः।

*(iii)* <u>देवदत्ताय</u> शतं धारयति।

*(iv)* <u>धावतोऽश्वात्</u> पतति।

*(v)* <u>सर्वस्मिन्ना</u>त्मास्ति।

*(c)* अधोलिखितानां सूत्राणामर्थोदाहरणानि संस्कृतेन *3-4* पंक्तिभिः लेख्यानि— 2×5=10

*(i)* मुखनासिकावचनोऽनुनासिकः

*(ii)* उरण् रपरः

*(iii)* अव्ययीभावे चाऽकाले

*(iv)* नदीभिश्च

*(v)* जनिकर्तुः प्रकृतिः

*(d)* संस्कृतव्याकरणशास्त्रे समासमाश्रित्य निबन्धो लेख्यः। 10

*(e)* बाह्यप्रयत्नानां स्वरूपं विवेचनीयम्। 10

**2.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* वैदिकसंस्कृतलौकिकसंस्कृतयोः को भेदः? भाषाविज्ञानदृष्ट्या विविच्यताम्। 20

What is the difference between Vedic Sanskrit and Classical Sanskrit? Explain according to linguistic point of view.

*(b)* संस्कृतकाव्यशास्त्रे रससिद्धान्तस्य महत्त्वं किम्? सविस्तरं समालोच्यताम्। 15

What is the importance of 'रससिद्धान्त'? Explain and elaborate.

*(c)* आकृतिमूलकवर्गीकरणस्य स्वरूपं विवृणुत। 15

Discuss the structure of 'आकृतिमूलकवर्गीकरण'.

**3.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* ''मेघे माघे गतं वयः''—उक्तिरियं समीक्ष्यताम्। 10

''मेघे माघे गतं वयः''—Examine critically this statement.

*(b)* संस्कृतनाट्यपरम्परायाः उत्पत्तिविकासयोः समीक्षा कार्या। 15

Examine critically the origin and development of Sanskrit 'नाट्यपरम्परा'.

*(c)* ''यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्''—उक्तिरियं विविच्यताम्। 15

''यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्''—Explain this statement.

*(d)* 'लक्षणा' कतिविधा? तस्याः स्वरूपं सोदाहरणं प्रतिपाद्यताम्। 10

What are the types of 'लक्षणा'? Explain with examples the characteristics of 'लक्षणा'.

4. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* ''रम्या रामायणी कथा''—उक्तिमिमां विमृशत। 20

''रम्या रामायणी कथा''—Justify this statement.

*(b)* ''उत्तरे रामचरिते भवभूतिर्विशिष्यते''—सोदाहरणं भणितिमिमां विशदयत। 15

''उत्तरे रामचरिते भवभूतिर्विशिष्यते''—Substantiate this statement with illustrations.

*(c)* संस्कृतकाव्यशास्त्रे प्रतिपादिताः 'काव्यहेतवः' विवेचनीयाः। 15

Elucidate 'काव्यहेतवः' as explained in Sanskrit poetics.

## खण्ड—B / SECTION—B

5. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 10×5=50

Answer all of the following (to be written in Sanskrit language) :

*(a)* षोडशसंस्काराणां नामोल्लेखपूर्वकं कोप्येकः संस्कारः विवेचनीयः।

*(b)* पुरुषार्थचतुष्टयमाश्रित्य निबन्धो लेख्यः।

*(c)* भारतीयज्ञानपरम्परायां वराहमिहिरस्य योगदानं समीक्ष्यताम्।

*(d)* आश्रमव्यवस्थायाः वैशिष्ट्यं निरूप्यताम्।

*(e)* स्थापत्यकलाक्षेत्रे प्राचीनभारतस्य योगदानं वर्णयत।

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* श्रीमद्भगवद्गीतायां प्रतिपादितम् आत्मस्वरूपं निरूप्यताम्। 20

Explain the characteristics of Ātman (आत्मन्) according to 'श्रीमद्भगवद्गीता'.

*(b)* शाङ्करवेदान्तानुसारं ब्रह्मस्वरूपं प्रतिपाद्यताम्। 15

Explain the concept of Brahman (ब्रह्म) according to Śāṅkara-Vedānta.

*(c)* सांख्यमतानुसारं प्रकृतेः स्वरूपं विवेचयत। 15

Explain the characteristics of 'प्रकृति' according to Sāṁkhya Philosophy.

**7.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* जैनदर्शनानुसारम् 'अनेकान्तवादः' इति विषयमाश्रित्य निबन्धो लेख्यः। 15

Write an essay on 'अनेकान्तवादः' as propagated in Jaina Philosophy.

*(b)* योगदर्शने प्रतिपादितम् 'अष्टाङ्गयोगं' सविस्तरं वर्णयत। 20

Explain 'अष्टाङ्गयोग' according to Yoga Philosophy.

*(c)* बौद्धदर्शनस्य 'विज्ञानवादं' विविच्यताम्। 15

Describe the 'विज्ञानवाद' according to Buddhist Philosophy.

**8.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

*(a)* अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

भवतः सफलतायै जगत् भवतः आदरं कुर्यात्। साफल्यस्य किमपि विवरणम् अपेक्षितं न भवति। तथा च वैफल्येन तु विवरणं न अनुमन्यते। परं भवतः आत्मगौरवभावना तावती अपेक्षिता यत् सफलता वा भवतु विफलता वा तेन भवतः आत्मविश्वासः कदापि नष्टः न भवेत्। यदि भवान् 10% अवसरेषु सफलः भवति तर्हि भवान् सम्यगेव कुर्वन् अस्ति इति मन्तव्यम्। यदि भवान् सर्वदा शतप्रतिशतं सफलः एव भवति तर्हि भवता स्वमुद्दिश्य प्रश्नः कर्तव्यः यत् 'मया पर्याप्तमात्रायाम् अपायाह्वानं (risk) स्वीक्रियमाणम् अस्ति उत न' इति। यदि भवान् पर्याप्तमात्रायाम् अपायाह्वानं स्वीकुर्वन् नास्ति तर्हि भवान् बहून् अवसरान् त्यक्तवान् इत्यर्थः। सम्यक् चिन्तयन्तु परन्तु महत् पदं निक्षिपतु। यदि कश्चन दोषः भवति तर्हि ततः पाठं पठतु। जीवनं भवतः उपरि सर्वविधमालिन्यं क्षिपेत्। कौशलं नाम भवता तेन अधः पातितेन न भवितव्यम्। वयं गभीरतमकूपेभ्यः अपि बहिः आगन्तुं शक्नुयाम—अस्थगनेन, प्रयत्नस्य अत्यागेन च। मालिन्यम् उज्जहातु। पदमेकम् उपरि निदधातु।

*(i)* आत्मगौरवभावनया किं भवितुमर्हति?

*(ii)* स्वमुद्दिश्य कः प्रश्नः कर्तव्यः?

*(iii)* अपायाह्वानस्य स्वीकरणं किमर्थम् आवश्यकम्?

*(iv)* कुतः पाठः स्वीकरणीयः?

*(v)* गभीरतमकूपेभ्यः कथं बहिः आगन्तुं शक्नुयाम?

*(b)* अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

संस्कृतकक्षासु भाषारूपेण संस्कृतभाषायाः प्रयोगेण संस्कृतस्य लाभः। प्रयोगे अकृते सः लाभः नास्ति इति तावदेव खलु इति प्रश्नः भवेत्। अलाभः इति केवलं न, हानिः अपि भवति। संस्कृतस्य भाषारूपेण अप्रयोगेण अन्यभाषाप्रयोगेण च छात्राणां मनसि संस्कृतं कठिनं तया भाषितुं अशक्या, सा निर्जीवा इत्यादयः भावनाः दृढतराः भवन्ति। तादृशभावनिर्माणे वयमेव कारणीभूताः भवामः। एवम् अप्रयोगेण न केवलम् अलाभः अपितु संस्कृतभाषायाः हानिः एव। एवं संस्कृतकक्षासु अन्यभाषाप्रयोगः नाम संस्कृतभाषायाः ह्रासस्य मार्गकल्पनम् इव। अतः संस्कृतकक्षासु संस्कृतभाषाप्रयोगः पुण्याय भवेत्, संस्कृतभाषायाः अप्रयोगः अपुण्याय भवेत्। संस्कृतभाषायाः अन्यभाषामाध्यमेन पाठनं कठिनतररूपेण पाठनं दुरवगम्यस्य प्रौढसंस्कृतस्य प्रयोगः च संस्कृतस्य पातनाय इव। संस्कृतभाषायाः संस्कृतभाषामाध्यमेन पाठनम्, आकर्षकपद्धत्या पाठनम्, सरलतमसंस्कृतस्य प्रयोगः च भाविसंस्कृतभवनस्य एकैकस्याः इष्टिकायाः स्थापनम् इव।

*(i)* संस्कृतकक्षासु संस्कृतभाषायाः अप्रयोगेण कीदृशी हानिः भवति?

*(ii)* ''संस्कृतभाषाप्रयोगः पुण्याय।'' स्पष्टीक्रियताम्।

*(iii)* 'संस्कृतं कठिनम्' एतादृशी भावना छात्राणां मनसि कथम् आयाति?

*(iv)* संस्कृतस्य पातनाय के कारकाः भवन्ति?

*(v)* संस्कृतभवनस्य एकैकस्याः इष्टिकायाः स्थापनं केन मार्गेण भवितुमर्हति?

★ ★ ★

# संस्कृतम्

प्रथमं प्रश्नपत्रम्

( साहित्यम् )

समयः होरात्रयम् (घंटा-त्रयम्)

पूर्णाङ्काः 250

**प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः**

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खण्डद्वये** विभाजिताः **अष्ट**-प्रश्नाः।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये। शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम्। तत्र प्रत्येकखण्डात् **एकम्** अवश्यं करणीयम्।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः।

प्रश्नसंख्या **1**, **5** तथा **8** **संस्कृतभाषयैव** समाधेयाः। शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा **प्रवेशपत्रे** स्वीकृत-भाषया करणीयम्। संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि। यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया। अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति।

# SANSKRIT

PAPER—I

( LITERATURE )

Time Allowed : Three Hours

Maximum Marks : 250

**QUESTION PAPER SPECIFIC INSTRUCTIONS**

**Please read each of the following instructions carefully before attempting questions**

There are EIGHT questions divided in TWO Sections.

Candidate has to attempt FIVE questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1**, **5** and **8** must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission Certificate. Answer written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड—A / SECTION—A

**1.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

*(a)* अधोनिर्दिष्टाः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 1×10=10

*(i)* अनुस्वारः, ह्, व्-वर्णानामुच्चारणस्थानानि लेख्यानि।

*(ii)* 'मम मित्राणि ग्रामं गच्छन्ति'—वाच्यपरिवर्तनं क्रियताम्।

*(iii)* 'अणुदित्सवर्णस्य चाऽऽप्रत्ययः' अत्र अणुप्रत्याहारान्तर्गताः वर्णाः लेखनीयाः।

*(iv)* प्रयोगे संवृतप्रयत्नवान् स्वरः कः?

*(v)* 'प्रकाशेन तायते'—वाच्यं परिवर्तयत।

*(vi)* 'पञ्चगङ्गम्' इत्यत्र विग्रहपूर्वकं समासनाम लिखत।

*(vii)* 'स्त्री प्रमाणी यस्य सः' इत्यत्र समासं समासनाम च दर्शयत।

*(viii)* टि संज्ञा का? केन नियमेन विधीयत एषा?

*(ix)* 'षण्णवतिः' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः विधेयः।

*(x)* 'अहो ईशाः' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिस्थितिः विशदनीया।

*(b)* अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सूत्रोल्लेखपूर्वकं विभक्तिप्रयोगः संस्कृतभाषया निर्णेयः — 2×5=10

*(i)* रामेण बाणेन हतो बाली।

*(ii)* हरिः वैकुण्ठम् अधिशेते।

*(iii)* सुधां क्षीरनिधिं मथ्नाति।

*(iv)* एधोदकस्य उपस्कुरुते।

*(v)* वनस्य अन्तिके मा याहि।

*(c)* अधोलिखितानां सूत्राणामर्थोदाहरणानि संस्कृतेन *3-4* पंक्तिभिर्लेख्यानि— 2×5=10

*(i)* उपदेशोऽजनुनासिक इत्

*(ii)* पूर्वत्रासिद्धम्

*(iii)* अपवर्गे तृतीया

*(iv)* कर्तृकरणे कृता बहुलम्

*(v)* तद्धितार्थोत्तरपदसमाहारे च

*(d)* एकशेषस्य स्वरूपं विवेचनीयम्। 10

*(e)* 'प्रायेणान्यपदार्थप्रधानो बहुव्रीहिः' इत्यत्र 'प्रायेण'-पदपाठस्य महत्त्वं प्रतिपाद्यताम्। 10

**2.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* वैदिकभाषायां तिङन्तप्रयोगवैशिष्ट्यं वर्णनीयम्। 20

Describe the special characteristics of the use of Tiṅ ending words in Vedic language.

*(b)* अर्थविकासस्य दिशः विवृणुत। 15

Elaborate the directions of semantic expansion.

*(c)* भाषाविज्ञानक्षेत्रे कात्यायनस्य योगदानं समीक्ष्यताम्। 15

Analyze the contribution of Kātyāyana in linguistic studies.

**3.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* संस्कृतकथासाहित्यमवलम्ब्य एको निबन्धो लेख्यः। 10

Write an essay on Sanskrit Kathā literature.

*(b)* ''प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी''—उक्तिरियं समीक्षणीया। 15

Critically appreciate the statement ''प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी''.

*(c)* रामायणस्योपजीव्यता विवेचनीया। 15

Discuss the *Rāmāyaṇa* as a sourcebook.

*(d)* संस्कृतमुक्तककाव्यानां समीक्षा विधेया। 10

Analyze Sanskrit Muktakakāvyas.

4. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) रससूत्रमुद्धृत्य विस्तरेण व्याख्यायताम्। 20

Cite and elaborate the Rasasūtra.

(b) रामायणस्य आदिकाव्यत्वं साधनीयम्। 15

Establish the *Rāmāyaṇa* as the first epic.

(c) "नैषधं विद्वदौषधम्"—सूक्तिरेषा विवेचनीया। 15

Justify the statement—"नैषधं विद्वदौषधम्".

## खण्ड—B / SECTION—B

5. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः — 10×5=50

Answer all of the following (to be written in Sanskrit language) :

(a) वेदारम्भसंस्कारस्य स्वरूपं महत्त्वं च प्रतिपाद्यताम्।

Describe the features and importance of Vedārambha Saṁskāra.

(b) भारतीयज्ञानपरम्परायामार्यभट्टस्य योगदानं समीक्षणीयम्।

Evaluate the contribution of Aryabhaṭṭa in Indian knowledge tradition.

(c) वर्णाश्रमयोः सम्बन्धं विवृणुत।

Discuss the relationship between the Varṇa system and Āśrama system.

(d) आश्रमेषु ज्येष्ठस्य आश्रमस्य महत्त्वं प्रतिपादयत।

Describe the importance of the superior Āśrama from among the Āśramas.

(e) प्राचीनभारते भित्तिचित्रकलायाः विकासः निरूपणीयः।

Describe the growth of the art form of wall painting in ancient India.

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

(a) श्रीमद्भगवद्गीतासु स्थितप्रज्ञलक्षणानि विवेच्यानि। 20

Elucidate the characteristics of Sthitaprajña according to the *Śrīmadbhagavadgītā*.

*(b)* सांख्यमाश्रित्य गुणत्रयस्य स्वरूपं कार्यविधिं च प्रतिपादयत। 15

Describe the features and functionings of three Guṇas according to Sāṁkhya Philosophy.

*(c)* शाङ्करभाष्यमवलम्ब्य 'शास्त्रयोनित्वात्' सूत्रं विवृणुत। 15

Explain the aphorism 'शास्त्रयोनित्वात्' according to Śāṅkarabhāṣyam.

**7.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः —

Answer all of the following :

*(a)* योगशास्त्रोक्तानि चित्तपरिकर्माणि प्रतिपादयत। 20

Elaborate the Chitta-parikarmas as presented in the Yogaśāstra.

*(b)* बौद्धदर्शने प्रतिपादितानि चत्वारि आर्यसत्यानि निरूपणीयानि। 15

Describe the Four-fold Noble Truths as discussed in the Buddhist Philosophy.

*(c)* वैशेषिकशास्त्रस्वीकृतो 'विशेष'नामकः पदार्थः प्रकाशनीयः। 15

Describe the concept of 'विशेष' as accepted in the Vaiśeṣika system of philosophy.

**8.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः —

Answer all of the following (to be written in Sanskrit language) :

*(a)* अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं *3-4* पंक्तिभिः भवेत्— 5×5=25

पृथिव्येषा माताऽस्मदादीनाम्। पृथिवीं विना जीवनस्य कल्पनाऽपि कर्तुं न शक्यते। पृथिव्यां जनसंख्यायाः महाभारः निरन्तरं वर्धत एव। नगरीकरणं तस्याधारभूतसंरचनाविकासार्थं च तरूणां निरन्तरमविचारितकर्त्तनं, प्राकृतिक-संसाधानामसीमितदोहनम्, अनावश्यकतटबन्धनिर्माणं सरित्सु—सर्वाण्येतानि पृथिवीं भृशं प्रदूषयन्ति। महोल्बायाः (ozone) अजस्रं क्षरणेन निखिले जगति प्रखरः असह्यश्च तापः भूयशः वर्धमानस्तिष्ठति। हिमानीगलनेन विश्वं भयाक्रान्तं जातम्। पृथिव्याः पर्यावरणस्य च रक्षणाय वृक्षारोपणमभियानरूपेण संचालयेयुः। जनैः स्वस्वजन्मदिवसेषु एकः फलवान् वृक्षः अवश्यमेव रोपणीयः। निपानेषु, जलाशयेषु, नदीषु, सागरेषु, पर्वतमालासु च अपशिष्टप्रक्षेपणात् आत्मनः निवारयेयुः। उपायैरेतैरस्मदीया पृथिवी आगामिवंशेभ्यः निवासार्हा भविष्यति।

*(i)* का माताऽस्मदादीनाम्?

*(ii)* पृथिव्यां कः निरन्तरं वर्धते?

*(iii)* नगरीकरणस्य विकासार्थं कानि कार्याणि क्रियमाणानि सन्ति?

*(iv)* महोल्बायाः क्षरणेन पृथिव्यां कः वर्धते?

*(v)* पृथिव्याः रक्षणाय किमभियानं सञ्चालनीयम्?

*(b)* अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानामुत्तरं देवनागरीलिप्या **स्वेन संस्कृतेन** दीयताम्। प्रत्येकमुत्तरं *3-4* पंक्तिभिर्भवेत्— 5×5=25

श्रीअन्नं स्वास्थ्यस्य पोषणस्य च दृष्ट्या अतिमहत्त्वपूर्णमस्ति। तस्मादेवाद्यत्वे श्रीअन्नं 'सुपरफूड' पोषणदायकमन्नमित्युच्यते। वज्रान्नं भविष्यान्नमिति सम्बोध्यते। श्रीअन्नोत्पादकेषु देशेषु भारतं शीर्षस्थं गण्यते। श्रीअन्ननिर्याते च द्वितीयस्थाने वर्तते अस्मद्देशः। श्रीअन्नानि एसिडग्लूटिनसशून्यानि सुपाच्यानि पौष्टिकानि च खाद्यान्नानि इति मन्यन्ते विशेषज्ञैः। वज्रान्नसेवनेन मधुमेहरोगभयं क्षीणतरं कर्तुं शक्यते। वज्रान्नं कैल्शियमायरनजिंकफास्फोरस-मैग्नीशियमपोटैशियमप्रभृतीनां खनिजानां समृद्धं स्रोतः अस्ति। अस्य नियमितसेवनेन कुपोषणवारणे महत्साहाय्यं प्राप्यते। यवनालः, वज्रान्नं, प्रियङ्गुः, कङ्गुः, कोद्रवः अणुश्च सकलानीयानि श्रीअन्नानि स्वास्थ्यवर्धकानि पोषणकराणि च सन्ति। सर्वकारैः कृषीवलाः श्रीअन्नोत्पादनसंवर्धनाय नैकविधं प्रेर्यमाणाः सन्ति।

*(i)* श्रीअन्नं किमर्थं महत्त्वपूर्णमस्ति?

*(ii)* कानि 'सुपरफूड' इत्युच्यन्ते?

*(iii)* कैः रहितानि श्रीअन्नानि सुपाच्यानि भवन्ति?

*(iv)* वज्रान्नसेवनेन कस्य रोगस्य भयं क्षीणतरं सञ्जायते?

*(v)* कस्य नियमितसेवनं कुपोषणं वारयति?

★★★

Civil Services (Main) Examination, 2024 वियोज्यम् *DETACHABLE*

# संस्कृतम् (प्रथमं प्रश्नपत्रम्)
# (साहित्यम्)

# SANSKRIT (Paper I)
# (LITERATURE)

*समयः : होरात्रयम् (घंटा-त्रयम्)*
*Time Allowed : Three Hours*

*पूर्णाङ्काः : 250*
*Maximum Marks : 250*

## प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खंडद्वयेषु** विभाजिताः **अष्ट** प्रश्नाः ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये । शेषप्रश्नेषु त्रयाणां समाधानं प्रदेयम् । तत्र प्रत्येकखण्डात् एकम् अवश्यं करणीयम् ।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः ।

प्रश्नसंख्या **1, 5** तथा **8 संस्कृतभाषयैव** समाधेयाः । शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा प्रवेशपत्रे स्वीकृत-भाषया करणीयम् । **संस्कृतभाषा** देवनागरी-लिप्या एव लेखनीया ।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया । अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति ।

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **TWO SECTIONS.**

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1, 5** and **8** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answer written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड 'A' SECTION 'A'

1.(a) अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः :

Answer all of the following (to be written in Sanskrit language) : 1×10=10

(i) 'झष्'-प्रत्याहारान्तर्गताः वर्णाः लेखनीयाः ।

(ii) 'सः वदति'- वाच्यपरिवर्तनं क्रियताम् ।

(iii) बाह्यप्रयत्नस्य कति भेदाः भवन्ति ? तेषां नामानि लिख्यन्ताम् ।

(iv) के उदितः कथ्यन्ते ?

(v) 'धान्यार्थः' इत्यत्र विग्रहपूर्वकं समासनाम लिखत ।

(vi) 'पूर्वस्यां शालायां भवः' इत्यत्र समासं समासनाम च दर्शयत ।

(vii) संयोगसंज्ञाविधायकं सूत्रं किम् ?

(viii) 'उपोषति' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः करणीयः ।

(ix) 'गङ्गोदकम्' इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिस्थितिः विवेचनीया ।

(x) 'त्वं पुस्तकं पठसि' - वाच्यपरिवर्तनं क्रियताम् ।

1.(b) अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सूत्रोल्लेखपूर्वकं विभक्तिप्रयोगः संस्कृतभाषया निर्णेयः : 2×5=10

(i) <u>दैत्येभ्यो</u> हरिरलम् ।

(ii) <u>वृक्षम्</u> अवचिनोति फलानि ।

(iii) <u>सतां</u> गतम् ।

(iv) माणवकं <u>धर्मं</u> भाषते ।

(v) <u>सर्वस्मिन्</u>नात्मास्ति ।

1.(c) अधोलिखितानां सूत्राणामर्थोदाहरणानि संस्कृतेन 3-4 पंक्तिभिर्लेख्यानि : 2×5=10

(i) तोर्लि ।

(ii) अतो रो रप्लुतादप्लुते ।

(iii) झलां जश् झशि ।

(iv) उरण् रपरः ।

(v) यथासंख्यमनुदेशः समानाम् ।

1.(d) उपपदविभक्तेः कारकविभक्तेश्च भिन्नत्वं प्रदर्शयत । 10

Discuss the difference between उपपद विभक्ति and कारक विभक्ति ।

1.(e) 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्यस्य सोदाहरणं व्याख्यानं कुरुत । 10

2. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

2.(a) वैदिकसंस्कृतलौकिकसंस्कृतयोः साम्यं वैषम्यञ्च विविच्यताम् । 20

Explain the similarities and dissimilarities between Vedic Sanskrit and Classical Sanskrit language.

2.(b) संस्कृतकाव्यशास्त्रे ध्वनिसिद्धान्तस्य वैशिष्ट्यं प्रकाश्यताम् । 15

Throw light on the characteristics of Dhvani-siddhānta in Sanskrit poetics.

2.(c) भाषाविज्ञानक्षेत्रे आचार्यभर्तृहरेः योगदानं निरूप्यताम् । 15

Describe the contribution of Acharya Bhartrihari to the field of linguistic studies.

3. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 15+10+15+10=50

3.(a) महाभारतस्य महत्स्वरूपं प्रकाशयत । 15

Throw light on the elaborated nature of Mahābhārata.

3.(b) महाकविकालिदासस्य सूक्तिसौन्दर्यं विशदयत । 10

Write an essay on the poetic beauty of 'Suktis' of Mahākavi Kālidāsa.

3.(c) व्यञ्जनायाः स्वरूपं सनिदर्शनं प्रतिपाद्यताम् । 15

Explain with examples the characteristics of 'Vyañjanā'.

3.(d) संस्कृतगद्यकाव्यस्य उत्पत्तिविकासयोः समीक्षा कार्या । 10

Explain the origin and development of Sanskrit Prose Literature.

4. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

4.(a) रूपकशब्दस्य व्युत्पत्तिलक्षणनिर्देशपूर्वकं तस्य प्रभेदान् वर्णयत । 20

Derive the term 'Rupaka' and describe its definition and types.

4.(b) रामायणस्य सांस्कृतिकं पक्षं प्रसाधयत । 15

Establish the cultural aspect of Rāmāyaṇa.

4.(c) संस्कृतकाव्यशास्त्रे प्रतिपादितानि काव्यप्रयोजनानि विशदयत । 15

Elucidate 'काव्यप्रयोजनानि' as described in Sanskrit poetics.

## खण्ड 'B' SECTION 'B'

5. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः : 10×5=50

Answer all of the following (to be written in Sanskrit language) :

5.(a) प्राचीनभारते कलानां वैविध्यमधिकृत्य निबन्धो लेख्यः । 10

5.(b) उपनयनसंस्कारस्य स्वरूपं महत्त्वं च प्रतिपाद्यताम् । 10

5.(c) संन्यासाश्रमस्य स्वरूपं महत्त्वं च वर्णयत । 10

5.(d) प्राचीनभारतीयचिकित्साधारायाम् आचार्यसुश्रुतस्य योगदानं विवृणुत । 10

5.(e) प्राचीनभारतीयज्ञानधारामनुसृत्य चतुर्णां वर्णानां कर्तव्यानि विवेचनीयानि । 10

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

6.(a) वेदान्तदर्शनानुसारं पञ्चकोशानां स्वरूपं वर्णयत । 20

Describe Pancha-Kosha according to Vedanta Philosophy.

6.(b) सांख्यदर्शनानुसारं 'पुरुषबहुत्वं' प्रतिपादयत । 15

Describe 'पुरुषबहुत्व' according to Sāṁkhya Philosophy.

6.(c) श्रीमद्भगवद्गीतानुसारं निष्कामकर्मयोगस्य स्वरूपं निरूपयत । 15

Explain the concept of 'निष्कामकर्मयोग' according to 'Śrīmadbhagavadgītā'.

7. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

7.(a) न्यायदर्शनानुसारम् अनुमानप्रमाणं प्रसाधयत । 20

Elucidate Anumāna Pramāṇa according to Nyāya Philosophy.

7.(b) वैशेषिकदर्शने कति द्रव्याणि सन्ति ? तेषां नामानि विलिख्य पृथिवीतेजसोः द्रव्ययोः स्वरूपं वर्णयत ।

How many Dravyas are there in Vaiśeshika Philosophy ? Write their names and describe the nature of Prithivi and Tejas Dravya. 15

7.(c) बौद्धदर्शने प्रतिपादितं प्रतीत्यसमुत्पादं वर्णयत । 15

Throw light on प्रतीत्यसमुत्पाद according to the Buddhist Philosophy.

**8.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः : 25+25=50

Answer all of the following (to be written in Sanskrit Language) :

**8. (a)** अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या स्वेन संस्कृतेन दीयताम् । प्रत्येकमुत्तरं 3-4 पंक्तिभिः भवेत् : 5×5=25

समग्रमपि जगत् अस्मदीयं कुटुम्बम् इत्येतां भावनां लोके या संस्कृतिः सभ्यता वा प्रासारयत् सा वैदिकी संस्कृतिरेव वर्तते । अस्याः संस्कृतेः प्रतिपादकानि सन्ति श्रुतयः स्मृतयः दर्शनानि, पुराणानि, गद्यपद्यनाटकादीनि सर्वाणि पुस्तकानि । एतेषां सर्वेषाम् एक एव स्वरो वर्तते यन् निखिलं विश्वं नीडवद् वर्तते । भारतीया महर्षयः एतस्मादेव कारणात् तादृशानाम् आदर्शानां, मूल्यानां, संस्काराणां प्रसारणमुचितं मेनिरे यादृशैः संस्कारैर्मानवस्य संकीर्णतानुदारतास्वार्थपरायणतादिदोषाः मलिना भवन्ति । मानवानां निर्माणकारि-उपादानं नानेकविद्या, न कलापारङ्गता, न ऐश्वर्यशालिता, न सुरूपता, नोच्चकुलतास्ति । मानवनिर्माणस्योपादानानि तु अन्यानि एव सन्ति । ईशावास्योपनिषद् एतादृशमेकमुपादानं मानवनिर्माणकरं ज्ञापयति यस्मिन् सत्यन्यस्यापेक्षैव न स्यात् -

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

मानवो येन निर्मीयते तदुपादानमुद्दिश्य पुनः ईशावास्योपनिषदाह -

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'
'तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्' इति ।

(i) का नाम संस्कृतिः विश्वं नीडवद् मन्यते ?

(ii) अस्याः संस्कृतेः प्रतिपादकाः ग्रन्थाः के ?

(iii) महर्षिभिः कीदृशाः संस्काराः प्रतिपादिताः ?

(iv) मानवानां निर्माणकारीणि उपादानानि कानि न सन्ति ?

(v) मानवनिर्माणकारि-उपादानेषु ईशावास्योपनिषदः कः सन्देशः ?

**8. (b)** अधोलिखितं सन्दर्भं सम्यगवधार्य तदधस्तात् पृष्टानामुत्तरं देवनागरीलिप्या स्वेन संस्कृतेन दीयताम् । प्रत्येकमुत्तरं 3-4 पंक्तिभिर्भवेत् : 5×5=25

अस्ति वेदान्तदर्शनं सर्वदर्शनमूर्धन्यम् । शारीरकमीमांसेत्येतयापि समाख्ययेदं शास्त्रं सर्वविदितम् । सन्त्यस्योपजीव्या उपनिषद् एव । वेदस्यान्तिमसिद्धान्तस्य निरूपकत्वादुपनिषदामिवास्यापि 'वेदान्त' इत्येषा संज्ञा अन्वर्था । औपनिषदानां वचनानां मिथो विरोधेनावभासमानानां सिद्धान्तानां विरोध-परिहाराय भगवान् बादरायणो व्यासो ब्रह्मसूत्रमित्यपरसंज्ञकं दर्शनमिदं प्राणैषीत् । एतत् ब्रह्मसूत्रनामकं दर्शनमखिलवेदान्तसिद्धान्तानामाकरग्रन्थः । भिक्षूणामादरणीयत्वाद् उपादेयत्वाच्च दर्शनमिदं भिक्षुसूत्रम् इत्येतामपि संज्ञां भजते ।

ब्रह्मसूत्रस्य बहवः भाष्यकाराः सन्ति । शङ्करभास्कररामानुजमध्वनिम्बार्कश्रीकण्ठश्रीपतिवल्लभ-विज्ञानभिक्षुबलदेवाः सन्ति प्रमुखाः अस्मिन् क्रमे । वेदान्तसाहित्यं विपुलतममस्ति । रामानुजमध्व-निम्बार्कवल्लभप्रभृत्याचार्याणां तेषामनुयायिनाञ्च साहित्यं वेदान्तदर्शनस्य भाण्डागारं सुतरां वर्धयति । दर्शनान्तरस्य किञ्च अन्येषामपि विषयाणां भाण्डागारमनायासेनैव अधरीकरोति ।

(i) वेदान्तदर्शनं कीदृशं दर्शनमस्ति ? किमर्थं चास्य 'वेदान्तसंज्ञा' भवति ?

(ii) वेदान्तदर्शनस्य उपजीव्याः काः ?

(iii) दर्शनस्यास्य कानि अपराणि नामानि ?

(iv) को ब्रह्मसूत्रं प्राणैषीत् किमर्थं च ?

(v) ब्रह्मसूत्रस्य के प्रमुखा भाष्यकाराः सन्ति ?

---